संख्यावतीतखनकैः खनितुं खनित्रै-
रारम्भि शालवलयो दहनेन दग्धुम् ॥ ५१ ॥
उत्तप्ततैलदहनज्वलदिन्धनादि-
प्राकारशृङ्गजनता क्षिपति स्म तत्र ।
उत्पातकाल इव घोर(?)मनःशिलाश्च
स्वैरं ववर्ष रिपुदर्पमिवाशु भुक्तम् ॥ ५२ ॥
कुप्यत्कृतान्तभटनिष्ठुरमुष्टिपात-
प्रायैरपायपरिवर्जितयन्त्रमुक्तैः ।
पाषाणगोलकशतैर्न्यपतन्विनेशु-(?)
र्नेशुश्च केचन बहिः प्रियजीवितव्याः ॥ ५३ ॥
सेनाविपक्षनृपतेरुपशालमूलं
कृलंकषेव कुलशैलतलं समेत्य ।
तद्भञ्जने विफलितौषधिकातिखिन्ना
क्षिप्रं पलायत ततः पुरसैन्यदास्त्रैः ॥ ५४ ॥
कृत्वाथ भेदितसमस्तपरिच्छदन्तं
राज्याच्च्युतं स विदधे गुरुमात्मबन्धुम् ।
भूयिष्ठभावविधिना सुखमेव चक्रा-
त्सूत्रेण कुम्भमचिरादिव कुम्भकारः ॥ ५५ ॥
गङ्गाधरप्रभवभेदविधानबीज-
संजातमत्सरतया विरराज पर्षत् ।
नाथं यथार्थमपि न रिपुवद्ददर्श
सर्वं विधौ हि विमुखे विमुखं जनस्य ॥ ५६ ॥

आदाय राज्यकमलामधनः स्वबन्धोः
सूत्रप्रकारमवमत्य महोपकारम् ।
गोत्रं निजे सुरतरङ्गवती सगोत्र-
गङ्गाधरः समजनि प्रथमः कलङ्कः ॥ १७ ॥

एकाक्ययं भवतु दूरविदेशगामी
पूर्वं यथास्य वचनादहमित्यवेत्य ।
मुक्तोऽथ तेन स चचाल ततः पदाभ्यां
पौरैः पदातिभिरिव साश्रुभिरीक्ष्यमानः ॥ १८ ॥

भ्रश्यन्मनोरथमयं स्फुरदात्मराज्यो-
पायस्तदा भ्रमदनभ्रमनाः क्षमायाम् ।
सेवां च न क्वचन कस्यचिदेष चक्रे
स्वातन्त्र्यराज्यमसमं स्ववशं हि तस्य ॥ १९ ॥

योगीश्वरं क्वचन भूभृदघोरघण्टं
वीक्ष्याश्रयत्परिचयोपचयाय तस्य ।
सोऽभूद्दयार्द्रहृदयोऽप्यनिगीर्णमुद्रः
क्षारं न किं लवणसागरतोऽम्बुमुष्टिम् ॥ २० ॥

निःशूकमानसतया जितदन्दशूक-
तुल्यो ममेति मुदितात्स्वगुरोः स दीक्षाम् ।
संसारपाशमिव दुर्गतिकन्थकायाः
कन्थावले विविधनिद्धफलं च सज्जन् ॥ २१ ॥

तस्यानुभाववसनो दुरनन्तरिक्षे
श्राम्यन्दिशोऽस्य नृपनीपवनाय बालन् ।
एतानिवानसदय निजनक्तमिर्च्यं
मत्स्यस्येव तव देव पुनन्तु मर्त्यन् ॥ २२ ॥

पृथ्वीपुरंदर......मेव तात-
दात्मीयवृद्धरथनं स्वपदुचमानाम् ।

किं तु त्वदीयमहनीयमहोपकार-
संसारवर्णघनिकैव करोति किंचित् ॥ १३ ॥

शुभ्रांशुशुभ्रजिनहर्म्यविभानिभेन
कृत्योपहासमिव यन्निदरोन्द्रपुर्याः ।
श्रीश्रीपुरेऽजनि नृपः किल तत्र शम्भु-
चित्रासलालसमना शशिनामधेयः ॥ १४ ॥

तस्मिन्शुभोदयदयादमदानमुख्यैः
सर्वत्र विश्रुतगुणैर्गुणिनां धुरीणः ।
श्रेष्ठी बभूव धनदो जिनधर्मकर्म-
निर्माणसंनिदितसिद्धिवधूविलासः ॥ १५ ॥

प्राणेशलोचनचकोरसुधांशुलेखा
लावण्यधाम ललना ललितेति तस्य ।
सूनुस्तयोस्त्वमभवः फलिताग्रवृक्ष-
स्तमेन सूचितधनो धनदत्तनामा ॥ १६ ॥

कान्तैर्गुणैः कृतपदस्य तदायमेव
दोष(?)मुवाजनि जगत्रितयप्रतीतः ।
कुक्षिंभरिर्यदति शारदचन्द्रसान्द्र-
ज्योत्स्नासपत्नरचिभिर्गुणिनां यशोभिः ॥ १७ ॥

त्यक्त्वा पुराणपुरुष नववासलाभ-
लोभादिवाथितमुरस्तोऽजनि तत्र वेदे ।
विष्णुर्द्विज प्रणयिनी कमला च तस्य
सूनुस्तयो समुदपद्यत देवशर्मा ॥ १८ ॥

जन्मान्तर नदनुयातवतो स पित्रो
पक्षीव तत्क्षणदभूदपपक्षभाव ।
बाल्येऽप्यनिष्टघटनाप्रभविष्णुरेष
कालानपेक्ष्य पतन सह बालदण्ड १९ ॥

पाठीनवल्लभतमां द्विजराजविद्या-
निर्दम्भकेलिसदनं जलसङ्गमुक्तम्।
बाल्येऽपि तस्य तदजायत धीरवत्त्वं
यन्मित्रमावहति कस्य न नाम चित्ते ॥ ७० ॥
दारिद्र्यविद्रुतमना न मनागपि स्वं
लेभे वदान्यजनतोऽपि गुणार्गलोऽपि।
कृच्छ्रादवाप्तकशिपुस्तु निजान्तराय-
दुष्कर्मतोऽयमभवत्कृतरङ्कशङ्कः ॥ ७१ ॥
भिक्षां भ्रमन्न तु गृहं कणमात्रवृत्तिः
क्षुत्क्षामकुक्षिरनिशं मललुप्तकान्तिः।
नव्यः शशीव जलदान्तरितप्रकाशः
श्रेष्ठचङ्गजेन ददृशेऽथ सता स तेन ॥ ७२ ॥
अत्यन्ताशुभकर्मसंचयवशान्निःश्रीकचूडामणिः
सद्योऽप्येष बभूव वैभववतां धुर्यो धनस्यैक्षणात्।
किं नो फाल्गुनफल्गुवल्गनवलात्क्षीणोऽपि वृक्षः क्षणा-
ल्लक्ष्मीर्याति विलोलपल्लवलतालास्यप्रशंस्या मधोः ॥ ७३ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के योगीन्द्रस्वरूपनिरूपणो नाम पञ्चमः सर्गः।

— — —

षष्ठः सर्गः।

अथोपयेमे स गिरीन्द्रपुत्रीरूपा विलेपच्छिदुरस्वरूपाः।
महर्द्धिविप्रान्वयसप्रसूताः कन्याः प्रभूताः स्मरशस्त्रभूताः ॥ १ ॥
रूपं मनोहारि वयो नवीनममाधुसङ्गो धनमत्ततेति।
मध्ये मनः सौधमनङ्गवह्नेर्घृताहुतिक्षेप इवास्य जज्ञे ॥ २ ॥
वदयः स्वकान्तोऽपि स धावति स्म मापायसङ्गासु पराङ्गनासु।
किं केतकीषु स्फुटकण्टकासु न याति जातीः परिहाय भृङ्गः ॥ ३

उदीर्णरागां स्मितनेत्रपत्रामम्भोजिनीं गायमिव द्विरेफः ।
अथैकदासौ रतिविह्वलाङ्गः पराङ्गनां प्राप च मन्मथं च ॥ ४ ॥
स नीयमानः स्फुटदङ्गपर्यग्रारक्षवीरैर्दृढबन्धबद्धः ।
वध्या च नो वध्यविडम्बनाभिर्विडम्बितोऽदर्शि धनात्मजेन ॥ ५ ॥
निवर्त्य तान्भूमिपतेः प्रधानमुपायनं भूरि धनं विधाय ।
तदाशयामोचि स तेन सद्योदानं विसर्वव्यसनापहारि ॥ ६ ॥
नीत्वात्मसौधे कृतमज्जनादि सर्वोपचारं सकलाङ्गसुस्थम् ।
स्वदुष्कृतोत्पत्तपनानुतापं वध्यायवक्रं तमुवाच मित्रम् ॥ ७ ॥
यदत्र जन्मन्यपि जन्मभाजां क्षेप्रं स्फुरद्भीमविडम्बनायाः ।
कराद्यभावव्यधबन्धबाधाविधौ च दुर्वारमिवारिचक्रम् ॥ ८ ॥
यन्निष्कलङ्कस्य कुलस्य कामं कलङ्कपङ्काय सनाननाय ।
स्फुरद्विपोर्म्मप्रतिमश्रुतीनां हेतुश्च धिक्कारपरम्पराणाम् ॥ ९ ॥
असंख्यदुःखैः खलु दुःखितानां यन्नारकाणां नरकेषु भूयः ।
धमानलोहाग्निशिखासमूहलोहाङ्गनालिङ्गनलम्भनाय ॥ १० ॥
वैधव्यदुःखं कुलबालिकानां दौर्भाग्यमङ्गीमनपत्यतां च ।
वियोगदावानलदाहदौस्थ्यं तनोति दौर्जन्यमिवादधपत् ॥ ११ ॥
प्रत्यूहसंदोहलताप्ररोहनवाम्बुवाहप्रतिहलभेनम् ।
तन्मित्र दूरादपराङ्गनाङ्गसंपर्कमङ्ग त्यज तीव्रपापम् ॥ १२ ॥
(पञ्चभिः कुलकम्

शीलप्रलम्बाभरणादवद्य पुण्यावधे [illegible] ।
कल्याणकोटिं कल्याणकार करामुजे कस्य न [illegible]म् ॥ १३ ॥
मूलं जगत्यपि यशोद्रुमस्य समस्तसम्पत्तितनुः [illegible] ।
प्रामावमानुदयपूर्वदान शील [illegible] परि[illegible] ॥ १४ ॥
रूपं जिनाद्युग्मजितस्वरूप [illegible] पराभूतसमस्तमन्मथेन ।
सपदि देहभृता यदत्र पूर्णेन्दु [illegible] नु नम् ॥ १५ ॥
आदेयताया पदसंनिधे [illegible]
शील समस्ताभिमतायाम [illegible] च ॥ १६ ॥

उदग्रसौभाग्यमसंख्यसौख्यं न व्यर्थता क्वापि मनोरथानाम् ।
एकातपत्रं च यदाधिपत्यं तच्छीलशीलायितमङ्गभाजाम् ॥ १७ ॥
विवेककल्पद्रुममञ्जरीव स्वर्लोकमार्गे शिबिकेव दिव्या ।
पृथुप्रतोली च विमुक्तिपुर्याः प्रिया न कस्यामलशीललीला ॥ १८ ॥
इमं गृहीत्वा धनदत्तदत्तं हितोपदेशं जलवत्तृषार्तः ।
पराङ्गनासङ्गनिवृत्तिरूपं चक्रे व्रतं तेन तु सातिचारम् ॥ १९ ॥
सोऽहं परस्त्रीषु रिरंसयाथ मालिन्यमाज्ञा किमपि व्रतेन ।
सामानि कः पुण्यजनाधिपस्य देवोऽभवं कुण्डलनामधेयः ॥ २० ॥
एवंविधेनाप्यनुशीलितेन शीलेन संपत्तिरजायतासौ ।
किं पङ्कसंपर्कजुषापि जात्यरत्नेन लभ्येत न भूरिलाभः ॥ २१ ॥
तदैहिकामुष्मिकदुःखशाखि कूलंकषा संनिममाश्रयन्ते ।
विशुद्धिसौरभ्यमराभिरामं शीलं शुभोदर्कपराय मन्त ॥ २२ ॥
रङ्कोपमस्यापि ममाविरासीद्दृशाविलासः परिपूरिताशः ।
युष्मत्प्रसादादिति भूमिपाल सीमापि निष्कारणवल्लभानाम् ॥ २३ ॥
प्राप्तुं परं पारमपारपारावारस्य विश्वेश कदापि शक्यम् ।
न तु त्वदीयानुपमोपकारस्नेहप्रकारस्य मया कथंचित् ॥ २४ ॥
कुलक्रमायातजिनेन्द्रधर्मकर्मैककामो धनदः पिता मे ।
श्रीमुस्थिताद्दस्य युगप्रधानगुरोरुपान्त्याशिवशर्म लेभे ॥ २५ ॥
प्रोल्लासिना देव निजेन कीर्तिर्जिनस्य भक्तिभवनोऽतिमात्रम् ।
महोत्सवै रञ्जितलोकलक्ष्मीश्छायामनस्योऽजनिरप्यनल्पा ॥ २६ ॥
दानादिभिः पुण्यविशेषकृत्यैर्नृत्यद्यशोऽपि सुरभीकृताहम ।
कदाप्यलक्ष्यैर्नृपतेर्विलक्षैस्त्वा मोऽप्यलक्ष्मीर्मुहुराशने स्म ॥ २७ ॥
नरेषु यद्वायुरिति त्वमिन्द्रलक्ष्मीमुपेक्ष्येव नृलोकपुर्याः ।
राज्ञस्तनूजो हरिविक्रमस्याभून्नृपतेर्विक्रमसिंहनामा ॥ २८ ॥
श्रुत्वेति पूर्वं निजजन्म पश्यञ्जातिस्मृतेः स्म च तथा स्वमर्थी ।
दीक्षा नृपो देवसमार्पितश्चिह्न मदेवनाय स्वद्रीव मद ॥ २९ ॥

देवः पुनः समणयं मणम्य विज्ञो नृपं विज्ञपयांबभूव ।
कन्येयमाधातुमनाकुलस्त्वं पित्रोः पवित्रा भवतोपनेया ॥ ३० ॥
निशादिनी कुर्वदिव धुरत्नसपत्नरत्नद्युतिभिर्विमानाम् ।
आरुह्य देवस्य गिरा नरेशः श्रीयोगिराजेन निषेव्यमाणः ॥ ३१ ॥
उपात्तकन्यार्धकटाक्षवीक्षा प्रसृत्वरानङ्गतरङ्गिताङ्गः ।
शृण्वन्स रामारमणीयगेयं पुरं जितारेस्त्वरितं जगाम ॥ ३२ ॥

(युग्मम्)

यक्षेन्द्रवाक्नैत्ररथैर्नरेन्द्रस्ततस्तदीयोपवनेऽवतीर्य ।
आमोधमानः सुमनःसमूहैः समं विशश्राम परिच्छदेन ॥ ३३ ॥
उद्यानपालः सहसोपलक्ष्यतां तां कन्यकां प्रीतिमतीं पतिं च ।
तत्रैयवासं रभसाज्जितारेर्निवेद्य जज्ञे परमोत्सवाय ॥ ३४ ॥
उत्कण्ठयोच्छृङ्खलया तदानीं संप्रेर्यतः क्षोणिवधूविलासी ।
तत्राभिगन्तुं पवनः प्रवृत्त्यानुकूल्या पीत इवाब्धिपारे ॥ ३५ ॥
ततः सुवर्णाभरणादिदानैर्दारिद्र्यविद्रावणजागरूकैः ।
उद्यानपालं स महीमहेन्द्रः कृतप्रसादं विससर्ज सद्यः ॥ ३६ ॥
कस्तूरिकाकुङ्कुमवारिपूरैः सिक्तेषु मार्गेषु विकीर्णपुष्पैः ।
प्रीत्या सहासेव नितान्तनृत्यद्भुजेव वायुप्रचलैर्ध्वजाग्रैः ॥ ३७ ॥
उद्यालकौतूहलनिर्निमेषैः सुरेशवेशैर्युवभिः सयोषैः ।
तदा सलीलं परितश्चलद्भिर्जितारिपूः स्वर्गपुरीव रेजे ॥ ३८ ॥

(युग्मम्)

अथाचलचञ्चलवाजिराजिखुरक्षतक्षोणिरजःप्रशान्तिम् ।
कुर्वञ्जितारिः करिकुम्भमूलगलन्मदाम्भोभिरभिक्षितीशम् ॥ ३९ ॥
उपागतं स्वागतिकं स पौरं नरेश्वरं विक्रमभूमिपालः ।
चकार योग्यप्रतिपत्तिमात्र निरन्तरस्नेरविवेकनेत्रम् ॥ ४० ॥
महेश्वरस्यैव नगाधिराजो राज्ञस्ततस्तस्य नृपो जितारिः ।
सिंहासन··················स्य स्वमेव सपत्युचितं चकार ॥ ४१ ॥

सहेलमागत्य कृतप्रणामामुदश्रुनेत्राम्बुरुहां स कन्याम् ।
उत्सङ्गमारोप्य शिरश्चुचुम्ब प्रमोदपीयूषपयोधिमग्नः ॥ ४२ ॥
संलापपीयूषविशेषवृष्टिं संक्षेपतः क्षोणिपतिर्विधाय ।
तां कल्पिताकल्पविभूषणाङ्गीं पुरीप्रवेशे प्रगुणां व्यधत्ताम् ॥ ४३ ॥
हिरण्यरत्नाभरणः करीन्द्रः श्रीविक्रमक्षोणिभृताधिरूढः ।
दधे सुरेन्द्राध्युषितस्य शोभामभङ्गुरां राजगजमरसानोः ॥ ४४ ॥
उदारशृङ्गारतरङ्गिताङ्गीं विधाय कन्यां पुरतो जितारिः ।
ऐरावणस्पर्धिनि वारणेन्द्रे पूर्वाद्रिशृङ्गेऽर्क इवारुरोह ॥ ४५ ॥
अनुज्ञया विक्रमभूमिभर्तुः शिश्राय देवोऽपि तदा विमानम् ।
क्षोणीतला संभविभूरिसावैः कौतूहलं कन्दलयञ्जनानाम् ॥ ४६ ॥
अथ प्रथीयश्चतुरङ्गरङ्गचमूभरन्यञ्चितभोगिराजः ।
समं समस्तैरचलज्जितारिः पुरं प्रति प्रीतिसमुत्तरङ्गैः ॥ ४७ ॥
निश्वासनादैः परितः स्फुरद्भिर्विचालयन्भूधरकन्दराणि ।
तूर्यत्रिकैः पल्लवयन्नमन्दमानन्दमापूरितरोदसीकैः ॥ ४८ ॥
विचित्रयानैर्नगरप्रधानैः सामन्तमित्रैरनुगम्यमानः ।
सुखासनेषु स्थितिमीयुषीभिरन्तःपुरीभिश्च सुसंवृताभिः ॥ ४९ ॥
स राजहंसोचितपुण्डरीकैः प्रफुल्लकासोज्ज्वलचामरैश्च ।
तत्त्वन्नकालेऽपि शरत्समृद्धिं पुरीं विवेश प्रसरत्प्रतापः ॥ ५० ॥
(चतुर्भिः कलापकम्)
कैलासशैलप्रतिमल्लसुधैः प्रसादमासाद्य नरेश्वरौ तौ ।
स्फुरद्विभूतिप्रतिभासमानौ रत्नासने शिश्रियतुः सभायाम् ॥ ५१ ॥
तत्रोल्लसत्सल्लास्यभरं तरङ्गि गीतध्वनिस्फूर्जिततूर्यनाद ।
तयोस्तदा वारविलासिनीभिर्वितेनिरे कौतुकमङ्गलानि ॥ ५२ ॥
अभ्यर्थितस्तत्र स संभ्रमेण जितारिणा विक्रमभूमिपालः ।
भ्रूसंज्ञया तस्य जगाद देवः कन्यापहारानयनादि सर्वम् ॥ ५३ ॥
उत्कर्णमाकर्ण्य वितीर्णतोषं स विक्रमं विक्रमसिद्धवृत्तम् ।
चिरं चमत्कारमयीव सर्वा सभा समं भूपतिना बभूव ॥ ५४ ॥

आदेशतः पत्युरथाजगाम तत्राल्पमात्रेण परिच्छदेन ।
·········प्रमोदप्रसरेण सार्धं देवी द्रुतं प्रीतिमती प्रहृष्टा ॥ ५५ ॥

श्रीविक्रमः कुण्डलकान्तिलिप्तकपोलभित्तेरथ कुण्डलस्य ।
वृत्तं स्फुरत्प्रेमनिबन्धनं तत्पुरः सभायाः प्रकटीचकार ॥ ५६ ॥

यशःपताकामिव मीनकेतोरास्येन दास्यं दिशती सुधांशोः ।
पित्रोपनीतां परमोत्सवेन कन्यां नृपस्तामथ पर्यणैषीत् ॥ ५७ ॥

श्रियःपतिः कौस्तुभमुख्यरत्नैरिवार्णवः प्रीतिसमुत्तरङ्गः ।
जामातरं भूपमपूजयत्तं धराधवः सिन्धुरवाजिदानैः ॥ ५८ ॥

शचीकुचाभोगविलासयोग्यैश्चीनांशुकैर्मौक्तिकहारिहारैः ।
तैस्तैर्महार्घै रुचिभिः पदार्थैः पुण्योर्प्रदं मेदुरयांचकार ॥ ५९ ॥

आभ्यां समं मूर्तजयप्रतापश्रीभ्यामिवान्येद्युरसीमसैन्याम् ।
दूरेऽनुगम्य क्षितिभृज्जयन्त्यां श्रीविक्रमाप्युत्कलयांचकार ॥ ६० ॥

पुरीं जयन्तीं सर्वजयन्तीं श्रीविक्रमः क्षोणिपतिः क्रमेण ।
सुरेश्वरस्यापि विलोकनीयमहोत्सवां प्रीतमना विवेश ॥ ६१ ॥

उत्कण्ठितायाः स भृशं प्रियायाः सुताय कण्ठे सुतजन्महेतुम् ।
न्यधत्त तं कुण्डलदत्तहारं पुण्योदयं मूर्तमिवात्मवंशे ॥ ६२ ॥

सुखप्रशान्तप्रविशद्गजेन्द्रसिंहेन्दुमुख्यस्वप्नविलोकनेन ।
समूचिताशेषविशेषसौख्यसाम्राज्यलक्ष्मीललिताधिपत्यम् ॥ ६३ ॥

तस्य प्रभावेण बभार गर्भं दिनेऽथ तत्रैव नृपप्रिया सा ।
सद्योऽप्यभीष्टार्थफलप्रसादा सर्वत्र दिव्या हि भवन्ति भावाः ॥ ६४ ॥
(युग्मम्)

गर्भानुभावप्रसवर्द्धिविशिष्टसौभाग्यसभाग्यवर्द्धितनाङ्गी ।
उदेष्यदुष्णद्युतिमण्डलाया प्राच्यास्तुला सा त्रिजगाबभूव ॥ ६५ ॥

आपन्नसत्त्वामभिवीक्ष्य देवी हर्षप्रकर्षं समभूत कस्य ।
तद्गर्भवृद्धे पिशुनौ स्तनौ तु बभूवतुः श्याममुखौ तदानीम् ॥ ६६ ॥

नखावयोरुद्गतिमेष जातः सहिष्यते हन्त विनानतानि ।
इति स्फुरत्खेदभराद्विबोधस्तस्याः स्तनौ श्याममुखावभूताम् ॥ ६७ ॥

गेहेष्वमागन्य कुतूहलायामनुरागुरैरनुरुद्धा स कन्याम् ।
उत्पाद्यमानोऽस्य शिरस्सु पुष्पपयोधरीरुत्तरीर्भिनत ॥ ४२ ॥
मंगलतूर्यस्वनोदगाढं गभीरः शोभितप्रियास ।
तं कल्याणकर्णाभरणत्वलक्ष्ये पुरीप्रवेशे मधुरारमणाय ॥ ४३ ॥
दिव्याम्बराभरण कवीन्द्र श्रीविक्रमाङ्काभिमुखाभिरुद्ध ।
दधौ पुरेन्द्रस्य पुरीनिवासे शोभामनङ्गस्य तनूजमानो ॥ ४४ ॥
उदारशृङ्गारनवीनपात्रीं निनाय कन्यां पुरतो निशाधि ।
पैरावतस्यापि निवासनिन्द्ये पूर्वाश्रयस्फाटिककेलिगेहे ॥ ४५ ॥
अनुग्रहात् विक्रमभूमिभर्तुः निवास देवोऽपि तदा विमानम् ।
क्षोणीतले यं स्वभावभूषितं कौतुकं कन्दर्पशाननानाम ॥ ४६ ॥
अथ प्रदीपप्रभुरङ्गरङ्गमनुसन्धाय नभोविभागम् ।
समं समस्तैरपरैर्जनानां पुरः पति वीक्षितभूमिभागे ॥ ४७ ॥
निशामनादै पतिर स्फुरद्भिर्विचित्रयन्भूतरकन्दराणि ।
तूर्यत्रिकैः पल्लवयन्नमन्दमानन्दमाधूर्यनिगोदमीके ॥ ४८ ॥
विचित्रयानैर्नगरप्रधानं सामन्तमित्रैरनुगम्यमान ।
सुखासनेषु स्थितिमीयुषीभिरन्तःपुरस्त्रीभिश्च समन्वितानि ॥ ४९ ॥
स राजहंसोऽचितपुण्डरीके प्रफुल्लकाशोज्ज्वलचामरेश्च ।
तत्त्वक्षकालेऽपि शरत्समृद्धिं पुरा विवेश प्रमदस्य नाथ ॥ ५० ॥

चतुर्भिः कलापकम्

कैलासशैलप्रतिमल्लमुच्चं प्रमादनस्याथ नरेन्द्रो ना
स्फुरद्विभूतिप्रतिभासमानो रत्नासने निर्विविशतुः सत्र याम् ॥ ५१ ॥
तत्रोल्लसल्लास्यभरं नगरि गीतध्वनिस्फारनवनिनाद ।
तयोस्तदा वारविलासिनीभिर्वितेनिरे कौतुकमङ्गलानि ॥ ५२ ॥
अभ्यर्थितस्तत्र स सभ्रमेण जितारिणा विक्रमभूमिपाल ।
भ्रूसंज्ञया तस्य जगाद देव कन्यापहारानयनादि सर्वम् ॥ ५३ ॥
उत्कर्णमाकर्ण्य वितीर्णतोष स विक्रम विक्रमसिंहवृत्तम् ।
चिरं चमत्कारमयीव सर्वा सभा समं भूपतिना बभूव ॥ ५४ ॥

आदेशतः पत्युरथाजगाम तत्राल्पमात्रेण परिच्छदेन ।
·······प्रमोदप्रसरेण सार्धं देवी द्रुतं प्रीतिमती महष्टा ॥ ५५ ॥
श्रीविक्रमः कुण्डलकान्तिलिप्तकपोलभित्तेरथ कुण्डलस्य ।
वृत्तं स्फुरत्प्रेमनिबन्धनं तत्पुरः सभायाः प्रकटीचकार ॥ ५६ ॥
यशःपताकामिव मीनकेतोरास्येन दास्यं दिशती सुधांशोः ।
पित्रोपनीतां परमोत्सवेन कन्यां नृपस्तामथ पर्यणैषीत् ॥ ५७ ॥
श्रियःपतिः कौस्तुभमुख्यरत्नैरिवार्णवः प्रीतिसमुत्तरङ्गः ।
जामातरं भूपमपूजयत्तं धराधवः सिन्धुरवाजिदानैः ॥ ५८ ॥
शचीकुचाभोगविलासयोग्यैश्चीनांशुकैर्मौक्तिकहारिहारैः ।
तैस्तैर्महार्घै रचिभिः पदार्थैः पुत्र्योर्मुदं मेदुरयांचकार ॥ ५९ ॥
आभ्यां समं मूर्तजयप्रतापश्रीभ्यामिवान्येद्युरसीमसैन्याम् ।
दूरेऽनुगम्य क्षितिभृज्जयन्तीं श्रीविक्रमामुत्कलयांचकार ॥ ६० ॥
पुरीं जयन्तीं वरवैजयन्तीं श्रीविक्रमः क्षोणिपतिः क्रमेण ।
सुरेश्वरस्यापि विलोकनीयमहोत्सवां प्रीतमना विवेश ॥ ६१ ॥
उत्कण्ठितायाः स भृशं प्रियाया सुताय कण्ठे सुतजन्महेतुम् ।
न्यधत्त तं कुण्डलरत्नहारं पुण्योदयं मूर्तमिवात्मवंशे ॥ ६२ ॥
सुखप्रशान्तिप्रविशद्गजेन्द्रसिंहेन्दुमुखप्रविलोकनेन ।
संसूचिताशेषविशेषसौख्यसाम्राज्यलक्ष्मीललिताधिपत्यम् ॥ ६३ ॥
तस्य प्रभावेण बभार गर्भं दिनेऽथ तत्रैव नृपप्रिया सा ।
सद्योऽप्यभीष्टार्थफलप्रसादाः सर्वत्र दिव्या हि भवन्ति भावाः ॥ ६४ ॥
(युग्मम्)

गर्भानुभावप्रभवद्विशिष्टसौभाग्यसम्भारनिरर्गलाङ्गा ।
उदेष्यदुष्णद्युतिमण्डलायाः प्राच्यास्तुलां सा बिभरांबभूव ॥ ६५ ॥
आपन्नसत्त्वामभिवीक्ष्य देवीं हर्षप्रकर्षं समभून्न कस्य ।
तद्गर्भवृद्धेः पिशुनौ स्तनौ तु बभूवतुः श्याममुखौ तदानीम् ॥ ६६ ॥
नवावयोरुद्धतिमेष जातः सहिष्यते हन्त विनीतशोभः ।
इति स्फुरत्खेदभरादिवोच्चैस्तन्व्याः स्तनौ श्याममुखावभूताम् ॥ ६७ ॥

सहेलमागत्य कृतप्रणामामुदश्रुनेत्राम्बुरुहां स कन्याम् ।
उत्सङ्गमारोप्य शिरश्चुचुम्ब प्रमोदपीयूषपयोधिमग्नः ॥ ४२ ॥
संलापपीयूषविशेषवृष्टिं संक्षेपतः क्षोणिपतिर्विधाय ।
तां कल्पिताकल्पविभूषणाङ्गीं पुरीप्रवेशे प्रगुणावभूताम् ॥ ४३ ॥
हिरण्यरत्नाभरणः करीन्द्रः श्रीविक्रमक्षोणिभृताधिरूढः ।
दध्रे सुरेन्द्राध्युषितस्य शोभामभङ्गुराजङ्गमरत्नसानोः ॥ ४४ ॥
उदारशृङ्गारतरङ्गिताङ्गीं विधाय कन्यां पुरतो जितारिः ।
ऐरावणस्पर्धिनि वारणेन्द्रे पूर्वाद्रिशृङ्गेऽर्क इवारुरोह ॥ ४५ ॥
अनुज्ञया विक्रमभूमिभर्तुः श्रिश्राय देवोऽपि तदा विमानम् ।
क्षोणीतलं संभविभूरिसावैः कौतूहलं कन्दलयज्जनानाम् ॥ ४६ ॥
अथ प्रथीयश्चतुरङ्गरङ्गच्चमूभरन्यञ्चितभोगिराजः ।
समं समस्तैरचलञ्जितारिः पुरं प्रति प्रीतिसमुत्तरङ्गैः ॥ ४७ ॥
निश्वासनादैः परितः स्फुरद्भिर्वाचालयन्भूधरकन्दराणि ।
तूर्यत्रिकैः पल्लवयन्नमन्दमानन्दमापूरितरोदसीकैः ॥ ४८ ॥
विचित्रयानैर्नगरप्रधानैः सामन्तमित्रैरनुगम्यमानः ।
सुखासनेषु स्थितिमीयुषीभिरन्तःपुरीभिश्च सुसंवृताभिः ॥ ४९ ॥
स राजहंसोचितपुण्डरीकैः प्रफुल्लकासोज्ज्वलचामरैश्च ।
तत्त्वनकालेऽपि शरत्समृद्धिं पुरीं विवेश प्रसरत्प्रतापः ॥ ५० ॥
(चतुर्भिः कलापकम्)

कैलासशैलप्रतिमल्लमुच्चैः प्रसादमासाद्य नरेश्वरौ तौ ।
स्फुरद्भिर्भूनिप्रतिभासमानौ रत्नासने शिश्रियतुः सभायाम् ॥ ५१ ॥
तत्रोल्लसल्लास्यभरं नटन्ति गीतध्वनिस्फर्जिततूर्यनादः ।
तयोस्तदा वारविलासिनीभिर्वितेनिरे कौतुकमङ्गलानि ॥ ५२ ॥
अभ्यर्थितस्तत्र स संभ्रमेण जिनाग्रिणा विक्रमभूमिपालः ।
भ्रूसंज्ञया तस्य जगाद देवः कन्यापहारानयनादि सर्वम् ॥ ५३ ॥
तत्कर्णमाकर्ण्य वितीर्णतोषः स विक्रमः विक्रममित्थवृत्तम् ।
चिरं चमत्कारमयीव सर्वा सभा समं भूपतिना बभूव ॥ ५४ ॥

आदेशतः पत्युरथाजगाम तत्राल्पमात्रेण परिच्छदेन ।
……प्रमोदप्रसरेण सार्धं देवी द्रुतं प्रीतिमती महेष्टा ॥ ५५ ॥
श्रीविक्रमः कुण्डलकान्तिलिप्तकपोलमित्तेरथ कुण्डलस्य ।
वृत्तं स्फुरत्प्रेमनिबन्धनं तत्पुरः सभायाः प्रकटीचकार ॥ ५६ ॥
यशःपताकामिव मीनकेतोरास्येन दास्यं दिशती सुधांशोः ।
पित्रोपनीतां परमोत्सवेन कन्यां नृपस्तामथ पर्यणैपीत् ॥ ५७ ॥
श्रियःपतिः कौस्तुभमुख्यरत्नैरिवार्णवः प्रीतिसमुच्चरङ्गः ।
जामातरं भूपमपूजयत्तं धराधवः सिन्धुरवाजिदानैः ॥ ५८ ॥
शचीकुचाभोगविलासयोग्यैश्चीनांशुकैर्मौक्तिकहारिहारैः ।
तैस्तैर्महार्घै रुचिभिः पदार्थैः पुत्र्योर्मुदं मेदुरयांचकार ॥ ५९ ॥
आभ्यां समं मूर्तजयप्रतापश्रीभ्यामिवान्येद्युरसीमसैन्याम् ।
दूरेऽनुगम्य क्षितिभृज्जयन्त्यां श्रीविक्रमामुत्कलयांचकार ॥ ६० ॥
पुरीं जयन्तीं वरवैजयन्तीं श्रीविक्रमः क्षोणिपतिः क्रमेण ।
सुरेश्वरस्यापि विलोकनीयमहोत्सवां प्रीतमना विवेश ॥ ६१ ॥
उत्कण्ठितायाः स भृशं प्रियायाः सुताय कण्ठे सुतजन्महेतुम् ।
न्यधत्त तं कुण्डलदत्तहारं पुण्योदयं मूर्तमिवात्मवंशे ॥ ६२ ॥
सुखप्रशान्तप्रविशद्गजेन्द्रसिंहेन्दुसुस्वप्नविलोकनेन ।
सम्पूर्णितनाशेषविशेषसौख्यसाम्राज्यलक्ष्मीललिताधिपत्यम् ॥ ६३ ॥
तस्य प्रभावेण बभार गर्भं दिनेऽथ तत्रैव नृपप्रिया सा ।
सद्योऽप्यभीष्टार्थफलप्रसादा सर्वत्र दिव्या हि भवन्ति भावाः ॥ ६४ ॥
(युग्मम्)
गर्भानुभावप्रभवद्विशिष्टसौभाग्यसम्भारनगह्निताङ्गा ।
उदेष्यदुष्णद्युतिमण्डलाया प्राच्यास्तुला सा श्रियमाबभूव ॥ ६५ ॥
आपन्नसत्त्वामभिवीक्ष्य देवीं हर्षप्रकर्षं समभून्न कस्य ।
तद्गर्भवृद्धेः पिशुनौ स्तनौ तु बभूवतुः श्याममुखौ तदानीम् ॥ ६६ ॥
न ह्यावयोरुद्धतिमेष जातः सहिष्यते हन्त विनीतवृत्तिः ।
इति स्फुरत्खेदभरादिवोच्चैस्तस्याः स्तनौ श्याममुखावभूताम् ॥ ६७ ॥

कस्यापि गर्भे समुपागतस्य पुण्यात्मनः शुद्धयशोविशालैः ।
संपूर्यमाणेव च पाण्डिमानं कपोलपाली कलयांचकार ॥ ६८ ॥
अलक्षितोपैर्नमने स्तनौ श्यामायमानौ तु निमग्नरोऽपि ।
समस्तनेतृशिरोऽलंकरणमसौ तनूजं जनयिष्यतीति ॥ ६९ ॥
गाम्भीर्यवार्धेरभिगर्भमस्य समागतस्यानुगमानगमाय ।
देव्याः शरीरे त्रिवलीतरङ्गा गङ्गेव लावण्यनिभादुपागात् ॥ ७० ॥
वसुंधराभारधुरंधरस्य सुतस्य गर्भे समुपागतस्य ।
तदानुभावान्मणिकुट्टिमेऽपि चचाल सामं वरपादपातम् ॥ ७१ ॥
मातुः प्रमोदप्रसरैरनल्पैः पितुः प्रतापैर्विदितारितापैः ।
सामन्तमध्ये शमनोरथैश्च सार्धं गुर्भेनैव चकार वृद्धिम् ॥ ७२ ॥
गजेन्द्रमारूढवती प्रियेण धृतातपत्राचलचामरश्रीः ।
कादम्बिनी चात्र पुरि भ्रमन्ती दानाम्बुना कन्दलयामि वृष्टिम् ॥ ७३ ॥
इति प्रियाया बहुपुण्यगर्भमाहात्म्यजं दोहदमाकल....म् ।
अपूपुरत्पौरपरम्पराभिर्व्यावर्णगर्माभ्युदयं मदेन ॥ ७४ ॥
रेजे कृतैः पुंसवनादिकृत्यैः स गर्भसंप्रीणनभावगर्भे ।
प्रशस्यसस्याङ्कुरमध्यभागा धरेव धाराधरवारिधारैः ॥ ७५ ॥
तैस्तैर्नृपोऽस्याः सुतजन्मचिह्नैः सर्वोत्सवोल्लासमगादवन्ध्यैः ।
रसालशाखीव च दक्षिणस्याः समीरणैः सूचितसद्वसन्तैः ॥ ७६ ॥
अतुल्यकल्याणकलापसंपत्कीर्तिप्रतापोन्नतिभिः परीतम् ।
असूत सा सूनुमनूनकान्ति साम्राज्यलक्ष्मीकुलधाम्नि लग्ने ॥ ७७ ॥
स्वच्छलाद्गीतगुणालिनीभिर्बद्धा बभूवामरपुष्पवृष्टिः ।
मुक्ता कुमारं प्रति पुण्यलक्ष्म्या कटाक्षविक्षेपपरम्परेव ॥ ७८ ॥
तस्येह माहात्म्यसुधापयोधेर्डिण्डीरपिण्डभ्रममादधानः ।
नैर्मल्यमुच्चैरथ यामिनीषु पुपोष पीयूषमयूखमाली ॥ ७९ ॥
(युग्मम्)
दिशः प्रसन्नाः शरदीव नद्यो वातास्तदामोदभृतो जनाश्च ।
बभूवुरभ्रे सुरदुन्दुभीनां पयोदनादप्रतिमा निनादाः ॥ ८० ॥

तत्र क्षणेऽभ्येत्य सुहृत्स देवः श्रीविक्रमं विक्रमिणं प्रणम्य ।
प्रमोदयामास कथाप्रबन्धैर्विशेषतोऽशेषमनीषिहृद्यैः ॥ ८१ ॥
नितम्बबिम्बस्तनभूरिभाराक्रान्तमन्दक्रमणक्रमाणाम् ।
प्रलम्बमुक्ताफलहारयष्टा स्खलद्गतानामतिवेगभावात् ॥ ८२ ॥
उच्छ्वासपूर्णस्य सरोरुहाणामासेदुषीणां सविधे नृपस्य ।
वक्त्रे ततोऽभ्यङ्गजजन्मवार्ता वार्ता विलासोऽजनि सुन्दरीणाम् ॥८३॥
(युग्मम्)

दिष्ट्या नरेन्द्राधिप वर्धसे त्वं श्रीप्रीतिमत्याः सुतजन्मनाथ ।
चन्द्रोदयेनेव सितद्वितीया तिथेर्जगज्जीवविलोकनेन ॥ ८४ ॥
पीत्वेति वाचं श्रुतिशुक्तिकाभ्यां सुधामिवासां विदधे प्रसादम् ।
स स्वर्णवस्त्रैर्मणिभूषणैश्च कन्दैरिवैश्वर्यमहाद्रुमस्य ॥ ८५ ॥
राज्ञस्तथान्यस्य सभाजनस्य तत्रोत्तरीयाणि मनोहराणि ।
निरन्तरस्वामिपदप्रसादश्रीशासनानीव तदा ददुस्ताः ॥ ८६ ॥
समादिदेशाथ नियोगिवर्गं सर्वत्र पुर्यां परमोत्सवाय ।
श्रियोऽनुरूपा सुतजन्मकाले न जायते कस्य महप्रवृत्तिः ॥ ८७ ॥
निरीक्षितुं नन्दनमुत्सुकोऽसौ कल्पद्रुमं जातमिवात्मगेहे ।
निवेद्यमानागमनः पुरोगैर्विशाम्पतिः सूतिगृहोन्मुखोऽभूत् ॥ ८८ ॥
द्वारेन्द्रनीलद्युतिमांसलाभिः समन्ततो वन्दनमालिकाभिः ।
रराज [illegible] दिव्यमहोत्सवश्रीः कपोलपत्राङ्कुरविभ्रमाभिः ॥ ८९ ॥
दूर्वैर्यद् दूर्वैर्मुशलैश्च भाति कौसुम्भरागारुणवस्त्रमध्ये ।
सपद्मरागाङ्गदबाहुयुग्मैर्विवाजनैर्मङ्गलदेवतानाम् ॥ ९० ॥
श्रीकुण्डलाख्येन सुरेण [illegible] यस्मै[illegible]पिताभिर्निजसुन्दरीभिः ।
राजन्यकान्ताभिरपि प्रमोदात्प्रारब्धकर्णामृतवीचिगीतम् ॥ ९१ ॥
यस्मिन्कुमारस्तु पतेच्छुरभ्रगङ्गाभिनीतोऽर्चमिषादिवागात् ।
यश्चन्द्रकान्तामलभित्तिभागकस्तूरिकाईमलवर्णभित्तिश्च ॥ ९२ ॥
मधुव्रतव्रातनिपीयमानसौरभ्य[illegible] यत्र च ।
भृतान्तरिक्षैर्गुरुधूपधूमैर्घनभ्रमात्तानिमयरवृन्दम् ॥ ९३ ॥

प्रेङ्खोलदुच्छृङ्खलकान्तिरत्नमालावचूलि‥‥‥वर्धितश्रि ।
यदन्तरङ्गीकृतदीप्तदीपज्योतिः कुमाराङ्गमरीचि चक्रे ॥ ९४

सर्वेन्द्रियाणामपि यत्समन्तादानन्दसाम्राज्यमिवादधानम् ।
स सूतिकावेश्म तदा विवेश विशांपतिः कौतुकनिर्निमेषः ॥ ९

(सप्तभिः कु

ससंभ्रमाथ प्रतिपत्तिपूर्वमुर्वीपतेरासनमाश्रितस्य ।
ततोऽनुजन्मानमिव स्मरस्य सादर्शयन्नन्दनमिन्दुकान्तम् ॥ ९

तमङ्कमारोप्य निरूप्य सम्यक्सल्लक्षणैर्लक्षितकाययष्टिम् ।
अमन्यत क्षोणिपतिर्धरित्रीभारं समुत्तीर्णमिव स्वदोष्णः ॥ ९७

कुम्भस्तनीभिर्नवहेमकुम्भैः पण्याङ्गनाभिः स्नपितः सरागम् ।
स कल्पिताकल्पविभूषणश्रीः सद्यः सभामण्डपमाससाद ॥ ९

कुरङ्गैस्तुङ्गै रणदनणुघण्टैः करटिभिः
सुवर्णैः सद्वर्णैर्वसननिकरैः सुन्दरतरैः ।
त्वयि स्वैरं वर्षत्यपि न शिरः केन दुधुवे
विमुच्यैकं क्षोणीभरपरवशं पन्नगपतिम् ॥ ९९ ॥

प्रकृत्यत्रं त्रिजगति सुधाम्याय साम्राज्यमुख्यैः
सर्वस्यापि प्रभवति शुभोदर्कसूरिष्टसिद्धिः ।
नैस्तैर्मा वैभुवनसुभगं मानुकं केन चित्र-
श्रियीयन्ते सुकृतसुलभे त्वत्कुमारोदयेऽत्र ॥ १०

इत्थं स वैतालिकचक्रवालमुख्याम्बुजश्रीलसितैर्वचोभिः ।
सुधानदीर्घेव पूर्णेन [illegible] परमाममंस्त ॥ १०

[illegible] विविध[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १०

[illegible]
[illegible]

प्रेङ्खोलदुच्छृङ्खलकान्तिरत्नमालावचूलि·········वर्धितश्रि ।
यदन्तरङ्गीकृतदीप्तदीपज्योतिः कुमाराङ्गमरीचि चक्रे ॥ ९४ ॥
सर्वेन्द्रियाणामपि यत्समन्तादानन्दसाम्राज्यमिवादधानम् ।
स सूतिकावेश्म तदा विवेश विशांपतिः कौतुकनिर्निमेषः ॥ ९५ ॥
(सप्तभिः कुलक

ससंभ्रमाय प्रतिपत्तिपूर्वमुर्वीपतेरासनमाश्रितस्य ।
ततोऽनुजन्मानमिव स्मरस्य सादर्शयन्नन्दनमिन्दुकान्तम् ॥ ९६ ॥
तमङ्कमारोप्य निरूप्य सम्यक्सल्लक्षणैर्लक्षितकाययष्टिम् ।
अमन्यत क्षोणिपतिर्धरित्रीभारं समुत्तीर्णमिव स्वदोष्णः ॥ ९७ ॥
कुम्भस्तनीभिर्नवहेमकुम्भैः पण्याङ्गनाभिः स्नपितः सरागम् ।
स कल्पिताकल्पविभूषणश्रीः सद्यः सभामण्डपमाससाद ॥ ९८ ॥

कुरङ्गैरुत्तुङ्गैः रणदनणुघण्टैः करटिभिः
सुवर्णैः सद्वर्णैर्वसननिकरैः सुन्दरतरैः ।
त्वयि स्वैरं वर्षत्यपि न शिरः केन दुधुवे
विमुच्यैकं क्षोणीभरपरवशं पन्नगपतिम् ॥ ९९ ॥
पुनश्छत्रं बिभ्रन्ति सुखम्थाय साम्राज्यमुच्चैः
सर्वस्यापि प्रभवति शुभोदर्कमुरिष्टसिद्धिः ।
तैस्तैर्भावैर्भुवनसुभगं मातृकैः केन चित्रे
श्रीमीयन्ते सुकृतसुलभे त्वत्कुमारोदयेऽत्र ॥ १०० ॥
इत्थं स वैतालिकचक्रवालमुखाम्बुजप्रोल्लसितैर्वचोभिः ।
सुधानिर्दग्धि पूर्णकर्णः स्वपुण्यलीलां परमाममंस्त ॥ १०१ ॥
विशेषविहितश्रिय विविधदानकृत्यक्षणे
भवन्नृजनतोषिणी ··· भूपतिः ।
येऽर्जुनि शुभ पुन भवन्नन्दनं नन्दने
जयन्तं इति ··· ॥ १०२ ॥

[illegible]

उद्यदङ्गगुरुरामणीयकं कामिनीनयनमोहनौषधम्।
प्राप यौवनमथैष पुण्यधीर्यत्रिवर्गपरमागभूषितम्॥ १४॥
अन्यदा तु युवराजमात्मजं श्रीजयन्तमकृताकृतिसरम्।
पर्यणाय यदथैष भूभुजां कन्यकाश्चतुररूपसंपदः॥ १५॥
तत्र संततमुदारमानसे प्रार्थना सफलतां गतार्थिनाम्।
नत्वनङ्गवशवर्तिचेतसामन्यदीयमृगशावचक्षुषाम्॥ १६॥
शस्त्रशास्त्रपरभागवेदिनां प्राप स प्रतिभया धुरीणताम्।
निर्जितेन्द्रियतया च नान्तरैर्बाध्यते स्म सुतरामरातिभिः॥ १७॥
कोऽपि विक्रमकथा तथा प्रथामाप तस्य भुजवीर्यशालिनः।
कर्णकोटरगता यथा द्विषामादधे मनसि शल्यतुल्यताम्॥ १८॥
तेन कीर्तिलतिका तथाधिकं भूरिदानसलिलैरसिच्यते।
तारकाकुसुमशालिनी यथा विश्वमण्डपतलेऽपि नो ममौ॥ १९॥
विक्रमक्षितिपतिर्न केवलं पुत्रशालिषु बभार धुर्यताम्।
तेन दर्पितरिपुप्रमाथिना पार्थिवेष्वपि धरातलेऽखिले॥ २०॥
यत्र यत्र सुकुमारपुंगवः संचचार सुभगाग्रणीः पथि।
तत्र तत्र तमनङ्गविभ्रमात्पूजयन्ति नयनोत्पलैः स्त्रियः॥ २१॥
तस्य कापि परमौचितीगुणस्तोमयुत्तमतमं व्यभूषयत्।
यामिनीरमणरश्मिभासुरं तारहारमिव नायको मणिः॥ २२॥
पूर्वजन्मशुभपासनामृतैर्वर्धितः सुकृतकल्पपादपः।
प्राज्ययानुपमया फलश्रिया तं तरङ्गितमुदं तदाकृत॥ २३॥
जाड्यतः सकलविश्वदु सह संनिगृह्य शिशिरं कुनायकम्।
तज्जयोर्जित इवाप सेवितुं श्रीजयन्तमिनमाश्रयन्मधुः॥ २४॥
श्रीवसन्तनृपतेः समागमे कोकिलध्वनिरुदच्छल····।
बन्दिवृन्दवदनाम्बुजान्तरं प्रोल्लसज्जयजयारवोपमः॥ २५॥
दाक्षिणात्यपवनो यथा यथा प्रासरत्प्रगुमरमारानल।
प्रेर्यमाण इव तेन भानुमानुत्तरां दिशमगात्तथा तथा॥ २६॥

केरलीकुचतटीविलासिनः कुन्तली चलितकुन्तलाञ्चलाः ।
सिंहलीवदनचुम्बनप्रियाः संचरन्ति मलयाचलानिलाः ॥ २७ ॥
तुल्यतां दयितचुम्बनोचितैः कामिनीविकचवक्त्रपङ्कजैः ।
भृङ्गपेयमधुभिर्ययासुभिर्वारिजैः समुदिताधिवारिषु ॥ २८ ॥
कौन्दपुष्पमपहाय जर्जरं निर्गुणं धनुरजायताधिकम् ।
चम्पकप्रसवचापमण्डलीलाभलोलुभमना मनोभवः ॥ २९ ॥
चञ्चरीकनिकरम्बचुम्बिताश्चम्पकेषु कलिकाश्चकासिरे ।
येन पथिकप्रमाथिना निर्मिता विषशिरा इवेषवः ॥ ३० ॥
प्रमणयिना मनोभुवा मानखण्डनविधौ मृगीदृशाम् ।
सोऽपि कलकण्ठकामिनीपञ्चमध्वनिरमीयताखलाम् ॥ ३१ ॥
लिह्य सहकारमञ्जरीः कूजितं किमपि बालकोकिलैः ।
तद्भार विषमेषुकार्मुकज्यानिनादपदवीं विलासिषु ॥ ३२ ॥
काननेषु कुरुविन्दपाटलाः पाटला स्मरबन्धिनीमुखे ।
सर्वतो बत विभान्ति लोहिता वैजयन्त्य इव माधवोद्धृताः ॥ ३३ ॥
चञ्चरीकनिकरः कृपापरः शाम्बिना शिरसि संवल्गुद्गु ।
व्याजहार विरहिप्रमाथिता मन्मथस्य पथिकप्रजेरिव ॥ ३४ ॥
तत्र चिन्तितसमस्तकाननेऽनेहसि क्षपितविप्रयोगिणि ।
प्राप तापकलितेषु मानिनीमानसेषु मदनोऽतिवम्भूतिम् ॥ ३५ ॥
दक्षिणानिलचलल्लताभुजा वीक्ष्य ताण्डववती मधुश्रियम् ।
मन्मथेन विभुनाप्यर्जितानीव नीपकुसुमानि रेजिरे ॥ ३६ ॥
क्षीरनीरनिधिवारिमज्जन मृणालपि [illegible] ।
रोहिणीप्रणयिना विनिर्ममे [illegible] ॥ ३७ ॥
विषयसुखनवप्रसवा [illegible]
पृष्ठ दुग्धकलकोकिलस्वान [illegible] ३८ ।
मारुत शरमुपादद [illegible] ।
नूनमावयदन्ननोरन [illegible] ३९ ॥

अध्वगप्रणयिनीषु दुर्दशां वीक्ष्यते करुणयेह मल्लिका ।
रोदतीव विपुलाश्रुभिर्भृशं स्पन्दमानमकरन्दबिन्दुभिः ॥ ४० ॥
यद्बभूव सहकारमञ्जरीशुद्धकण्ठकलकण्ठकूजितम् ।
मानिनीनिवहमानि संततेस्तत्प्रवासपटहस्फुटक्रियम् ॥ ४१ ॥
माधवेन कुसुमेषुभूपतेः क्रीडनाय कलधौतपर्वताः ।
निर्मिता इव विभान्ति चम्पका स्मेरगौरकुसुमावगुण्ठिताः ॥ ४२ ॥
कामविश्वविजयप्रशस्तयः पुष्पसंचयविनिर्मिताक्षराः ।
चैत्रमासि नवमालिकालता लोकलोचनकृतोत्सवा बभुः ॥ ४३ ॥
स्वर्णतोरणविलासदोलयान्दोलनैः कृतगतागतैर्मुहुः ।
वीक्षितुं त्रिदिववामचक्षुषोऽभ्यासभङ्गिमिव कुर्वतेऽङ्गनाः ॥ ४४ ॥
श्यामवृत्तमुपरिस्थषट्पदं(?) किंशुकस्य कुसुमं नवं बभौ ।
स्वं निधानमिव मुद्रितं जतुन्यासतः सुरभिणाधरोर्ध्वयोः ॥ ४५ ॥
किंशुकस्य शुकचञ्चुचातुरीचारिमाणि कुसुमानि रेजिरे ।
विभ्रमं मधुवधूवनश्रियो वाससां दधति शोणरोचिषाम् ॥ ४६ ॥
त्यक्तपात्रनिकरः समन्ततश्चया(?) विरहितोऽसदाश्रयः ।
इत्यमूनि मधुकानि दुःखितानीव पेतुरवनीतले ततः ॥ ४७ ॥
पाटला विकचपुष्पसंपदोऽन्यैव काचन लिपिर्विजृम्भते ।
दिक्षु वल्गति मदीयसौरभेऽन्यत्र सौरभकथैव मुद्रिता ॥ ४८ ॥
माधवी विकचपुष्पलोचनैः पश्यतीव मधुमूपसंपदम् ।
यूथिकाप्रथमुपानयद्दृशां क्षीरसागरमिव स्वकान्तिभिः ॥ ४९ ॥
प्रेयसां नवसमागमे मधौ तत्क्षणोधदनुरागसागरे ।
अर्पयन्ति बकुलश्रियः स्रजं स्निग्धमात्महृदयं च सुभ्रुवः ॥ ५० ॥
वीक्ष्य पुष्पितमशोकशाखिनं त्र्यम्बकाम्बकहुताशशङ्कया ।
उद्विलासलहरीस्मराङ्गिनीरङ्गनाः शरणिमादधे स्मरः ॥ ५१ ॥
चर्चरीष्वनुपदं विलासिनीवृन्दगीतकलपञ्चमध्वनिः ।
उल्ललास कुसुमेषुभूपतेः कोपदुंदुभिरिवावनीजये ॥ ५२ ॥

चर्चरीषु परमोत्सवे मधौ स्त्रैणविभ्रमविलासनर्तनैः ।
कौतुकैः सरसतां नये ययुर्योगिनो दृषद एव तेऽथवा ॥ ५३ ॥
घर्मवृष्टिशिशिरैररंतुदाः सर्वदैव ऋतवोऽपरेऽङ्गिनाम् ।
सर्वकामदतया पुनः·····श्रीवसन्तसमयः प्रियंकरः ॥ ५४ ॥
कस्य कस्य न तरोर्यथोचितैः श्लाघ्यपुष्पफलपत्रसंचयैः ।
रामणीयकविनोदनाटके सु(सू)त्रधारपदवीं दधौ मधुः ॥ ५५ ॥
सर्वतः प्रथितरामणीयकं मायसो जितसमाधिवैभवम् ।
योगिनामपि किमन्यदुच्यते स्त्रीविलाससरसावधौ(?) मधौ ॥ ५६ ॥
गन्धलुब्धमधुपाङ्गनारुतव्याजगीतगुणपुष्पभूषणम् ।
द्वारपालविनिवेदितस्ततोऽद्या(ध्या)नपाल उपभूपमाययौ ॥ ५७ ॥
नासिकापुटनिपेयसौरभैः पञ्चवर्णकुसुमैर्विनिर्मितम् ।
पुष्पकन्दुकमयं समर्पयन्विक्रमक्षितिपतिं व्यजिज्ञपत् ॥ ५८ ॥
त्वं कुमार इव देव सांप्रतं श्रीवसन्तऋतुरेष राजते ।
यः प्रयाति सुमनः प्रशस्यतां विश्वजिष्णुविषमायुधोदयः ॥ ५९ ॥
मेघमण्डलविलोकनोल्लसत्तोषताण्डवजुषः शिखण्डिनः ।
तत्र तूर्णमतिशेरतां जना दर्शनेन भवतो मधूत्सवे ॥ ६० ॥
रवन्निदेशवशतोऽथवा भवनन्दने विशति काननक्षितौ ।
तत्र नन्दनवनावनाविव स्वैरमेतु परिपूर्णतां महः ॥ ६१ ॥
आज्ञया पितुरथ प्रथीयसा वैभवेन नलकूबरोपमः ।
प्राप चैत्ररथचारु तद्वनं नन्दनः सुवदनाभिरावृतः ॥ ६२ ॥
सानुरागहृदयं सुलोचना लोचनैर्मधुकरैरिवोत्पलैः ।
शिश्रिये स सकलाङ्कचारिमासीमसौरभविभूतिलोलुपैः ॥ ६३ ॥
गीयते स्म सुदृशां गणेन तन्मचरित्रमतिमात्रचित्रदम् ।
कौतुकादुपवनैर्यथाधिकं किंनरैरपि शिरो व्यधूयत ॥ ६४ ॥
सर्वलोकरतिदानमात्मनो दर्शनात्सफलनो मते मनम् ।
इत्यमुष्य किल कुण्डलच्छलाच्चर्ंसति स्मरवचोरद्वयी ॥ ६५ ॥

अस्य विद्धि सखि किंचनाद्भुतं लोचनत्रयमुमापतेरिव ।
एकमुल्बणविवेकलक्षणं विश्वयौवतविमोहने परे ॥ ६६ ॥
भाति हारलतिकास्य वक्षसि प्रार्थितास्पदनिवाससंतोषतः ।
उत्तरीयकमिवेन्दुविभ्रमं नृत्यवेगवशतश्च्युतं श्रियः ॥ ६७ ॥
अस्य वीक्ष्य ललितं तथाङ्गना जल्पितं हसितमिङ्गितं गतम् ।
सानुरागमति ताः परस्परं वर्णनं श्रवणगोचरं व्यधुः ॥ ६८ ॥
(चतुर्भिः कलापकम्)

हावभावमविलासविभ्रमैस्तत्र तत्र विहिताप्सरोभ्रमैः ।
विश्वविस्मयरसं स यौवतैर्गीतनृत्यकलयान्वभाव्यत ॥ ६९ ॥
तुङ्गविदाशिखराग्रनर्तनैश्चक्रकोरविजयिभ्रमिक्रमैः ।
लोसिकातिशयदुष्करैर्नृणामाचकर्ष हृदयं समं घनैः ॥ ७० ॥
नाटकाभिनयनैर्निरन्तरैस्तत्तदीप्णशुभपात्रसूत्रितैः ।
भूरिभङ्गिरसपाकपेशलैस्तत्र सोऽभजदपूर्वकौतुकम् ॥ ७१ ॥
विश्वविश्ववलयादुपागतैः कौतुकादिव समस्तकौतुकैः ।
स व्यधत्त जननेत्रपारणां श्रीजयन्तयुवराजशेखरः ॥ ७२ ॥
रूपयौवनविलासऋद्धिभिर्दानवर्धकतयाद्भुतैर्गुणैः ।
तत्र तस्य सुभगं भविष्णुता कस्य कस्य न ननर्त चेतसि ॥ ७३ ॥
कार्यकाञ्चनकिङ्किणीरणरणत्कारापनिद्रस्मरं
दोलान्दोलनकौतुकं मृगदृशामालोक्य लोकोत्तरम् ।
तत्रामन्दमनाः प्रयाति नलिनीकान्तः प्रशान्तैर्हयै-
र्मन्दंमन्दमनीव वृद्धिमधिका पुष्णन्त्यमी वासराः ॥ ७४ ॥
एते श्रीमण्डमण्डैः प्रियसुहृद इव प्राप्तिनामोदमुद्रा
दोलाप्रेङ्खत्सखीघनजघनरटत्कारकारैः स्मरन्तः ।
कावेरीतीरचातुर्यनिकरसुभगमन्यसीमा रमन्ते
दान्ताः स्वर्गश्रियेन श्रवदमृतसमाधेयमन्त्रीरविवाः ॥ ७५ ॥
इत्थं सा पञ्चबाणोत्सवजनितमनश्रीमण्डलाधीश्वर
मैत्रीप्रेमविलास लक्ष्मी पुष्ट महार्णवमिव ।

साम्राज्यं मधुरं मधोर्मधुसखस्वाधीनसंपद्भरं
वैराग्याश्रितचेतसामपि चिरं केषां न रागास्पदम् ॥ ७६ ॥
स्त्रैणैः पादप्रहारैः कुचकलशतटीताडनैरीक्षणाद्यै-
र्निर्भिन्नत्वे(?)प्यशोकप्रमुखविटपिनो पुष्पराजिच्छलेन ।
व्यक्तः कामानुरागः प्रसरति पुलकैः कामुकानामिवास्य
प्राज्ये राज्ये विलासानिशय इह मधौ कस्य धत्ते न चित्रम् ॥ ७७ ॥
इति बहुविधविस्मयाभिरामा नृपतितनयेन विलोकिता वनश्रीः ।
इयमतिसुमनाः प्रियेण सुभ्रूर्निजमिव रूपफलं समाससाद ॥ ७८ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के वसन्तवर्णनो नाम सप्तमः सर्गः ।

अष्टमः सर्गः ।

अथ सरसमपश्यत्तत्र ता श्रीजयन्तो
युवतिनिवहदोलान्दोलनानन्दकेलिम् ।
त्रिभुवनजनहृद्यां यत्र सौभाग्यभङ्गीं
भजति रतिविलासी पूर्णिमायामिवेन्दुः ॥ १ ॥
तरलमिह दोलान्दोलनैः कापि भाति
श्रवणयुगलखेलत्कुण्डलैः पक्ष्मलाक्षी ।
उभयतटविटङ्कप्रोल्लसच्चन्द्रसूर्या
प्रसृमरगुरुशोभा व्योमलक्ष्मीरिवोर्ध्वैः ॥ २ ॥
कुचकलशनिपातप्रोच्छलत्तारहार-
प्रचुररचितवितानैर्व्योम्नि दोलाधिरूढा ।
प्रबलपवनरङ्गत्क्षोभगङ्गातरङ्ग-
श्रियमिव विदधाना भाति काचिल्लनभ् ॥ ३ ॥
विधुति चलितदोलान्दोलितायाः मृगाक्ष्याः
पटुपवनतरङ्गैरुत्तरीयेऽपनीते ।
दिशि दिशि विसरद्भिर्लावण्यपूरै-
र्हृतहृदयनेत्रा नाभवन्के युवानः ॥ ४ ॥

तदनु करनिर्यत्कान्तिपीयूषवर्षैः
क्षतकृत इव तापः शान्तिमानीयते स्म ॥ ११ ॥

कुसुमशरनरेन्द्रस्यायुधोपायनानि
प्रगुणयितुमिवैका(?)कामिनी पुष्पजातम् ।
त्वरितमवचिकायाक्रम्य रम्यस्तनान्तैः
शिखरिशिखरशाखाशेखरेभ्यः सुखेन ॥ १२ ॥

भ्रमररवमिषेणालापपीयूषवर्षाः
स्मितरुचिरतरस्याः सौरभेणाभिरामाः ।
इह हि सुमनसोऽपि स्त्रैणजात्या समाना-
स्तदपि समुदमूल्यं ताभिरुद्यन्मदाभिः ॥ १३ ॥

प्रथमरमकरन्दोद्दामलक्ष्मीनिवासे-
ऽनुपमकुसुमकोशे लुप्यमाने समन्तात् ।
नरपतिरमणीभिः कोऽप्यलीनां विरावः
समजनि हृतवित्तः को न वा पूत्करोति ॥ १४ ॥

गगनतलतरङ्गत्तुङ्गगौराङ्गनाभिः
क्षितिधवयुवतीनां द्रागलक्ष्मीकृतेषु ।
अवचयविधिरासीच्चम्पकेषु स्मितेषु
भ्रमरमिथुनलीलालीननालोकनेन ॥ १५ ॥

चरणकमलमेकं पादमूले सहेल
मृदुभुजयुगलं च स्कन्धदेशे निवेश्य ।
सरससुरतकेलिप्रोत्कमाणि वराघ-
प्रियमिव नरपुंगमः रोहणनाम्नी ॥ १६ ॥

अलिकुलरमणीयैर्मांसल पल्लवाग्रे
सरभसमर्पितद् केसर सुन्दराणि ।
त्रिभुवनसुभगानि पुष्पचापस्य पुष्प
फलित १८ नवीन वल्लभास्याद केे ॥ १...

मधुकलसमनाभिं स्फारसौरम्यसारं
कुसुमनिवहमेतां यं गृहीतुं प्रयान्ति ।
तदभिरुचितवासैस्ता अदृइयन्त भृङ्गैः
परपरिभवकारी कः किल प्रीतिमेति ॥ १८ ॥

तरुशिखरगतायास्तत्र कस्याश्चिदुच्चै-
र्मरकतमणिरोचिर्मेचका काययष्टिः ।
विकसितसितपुष्पैश्चुम्बितैर्योततेऽस्म
स्फुरितरुचिरतारा व्योमवीथीव रात्रौ ॥ १९ ॥

कुसुममधिरसान्द्रैरावृतं तत्र पत्रैः
परमपरिमलाढ्यं सस्तनं संचरद्भिः ।
मधुकरनिकुरम्बैः कः पिबेत्यावचिक्ये
भवति हि मलिनानां संगमो भङ्गहेतुः ॥ २० ॥

कुवलयदलनेत्रां पक्कनारङ्गनव्य-
त्वगुदितरसधाराक्षेपतो व्याकुलाक्षीम् ।
विदधदथ जयन्तोऽन्यां चुचुम्बे तदग्रे
गुरुरिह चतुरत्वे कामदेवोऽस्य नूनम् ॥ २१ ॥

अतिचतुरतयैकाः शाखिशाखाशिखासु
सितबहुविधपुष्पाकाङ्क्षया चञ्चलाक्ष्यः ।
द्रुतपदमनिरोहन्ति स्म तत्पादशङ्का-
परिकलनभुवस्ता श्रीजयन्तं भियस्तु ॥ २२ ॥

कुचकलशनितम्बस्तम्भभारेण नम्रा
स्खलितगतिपदाब्जा बालवृक्षात्पतन्ती ।
त्वरितमथ भुजाग्रे कापि कान्तेन दध्रे
धुरि तु सुभगकान्ताचक्रवालस्य बाला ॥ २३ ॥

तरुणनरतरूणामात्तपुष्पास्तरुण्यः
कृतनर्मशिम्बराणा शोणकान्तिच्छटाभिः ।

विद्धुरिव कृतज्ञालप्रवालद्रुमत्वं
फलति सहृदयेषु क्षिप्रमेवोपकारः ॥ २४ ॥
उदतरदवचीयक्षीणमाशु द्रुमेभ्यः
कुसुमपटलिमार्द्रं भावुकं सौरभेण ।
भजति किमु न नाशं वैभवं कुस्थितीना-
मिति वददिव नादैर्मञ्जुमञ्जीरकाणाम् ॥ २५ ॥
तपनकिरणजन्यप्रौढसंतापशान्त्यै
मृदुशिशिरसुगन्धैर्मारुतस्यार्पिताङ्गयः ।
हिमसमकुसुमानां भूषणैर्भूपिनास्ताः
क्षणमतुलविलासा व्यथमलथमायाम् ॥ २६ ॥
बहुविहगनिनादैर्बन्दिवृन्दैरिवोक्तै
विकटविटपवीथीच्छायया शीतमार्गे ।
पृथुसरसि स हंसीमण्डलेनेव हंसः
समचरदथ तस्मिन्सार्द्धमन्तःपुरेण ॥ २७ ॥
चुलुकमनुकरोति स्वच्छमच्छोदमप्ये
भजति न महिमानं यस्य पम्पासरोऽपि ।
ारिभवपदमर्ते(?)मानम श्रीविवादै
स्पृहयति च विभूतेस्ताण्डवं दुग्धसिन्धु ॥ २८ ॥
ानकरपरिनमा दिग्गजा वारिकेलौ
दधति खलु [न]यन्न पुनरापोनशङ्काम् ।
ौलशमयविमुक्ता बालशैवालवल्ली
ाशलतटकुटीरे यस्य चाम्बुनीन्द्रा ॥ २९ ॥ ( )
ि गुरुतरङ्गालिङ्गितव्योमरङ्गे
रतिफलनमिषेणाम्भोदमाला च यत्र ।
ारमभिवोधं पातुकामा निकाम
ि रदनरदनाभशारनीरार्णवाम्बु ॥ ३० ॥

मधुकरनिकुरम्बैरम्बराद्रिः समन्तः
स्फुरति परिमलार्थे भोगमागमनल्पः ।
अभिनवशिशिरान्तस्फारगोभाभिरामा
प्रसरदपि सलिलततरंगा लसन्ति ॥ २१ ॥
विकसितनवनीलीमिलिते यत्र नील-
स्परितनव……गुञ्जापुञ्जपुञ्जं विभाति ।
कलितनलिनगुम्फा मकरार्थं पद्मिनी-
मलयकुसुमकान्तिश्रेणिकण्ठेपरावलीर्णम् ॥ २२ ॥
मधुमदशिथिलाङ्गाङ्गानुगा भ्रम्यमाणा-
स्तमसि पतितापश्चन्द्रनश्चन्द्रिकेयम् ।
गगनपवनतुन्माकन्दमालेव यस्मि-
न्मुकुलहरिविरावैर्लक्ष्यतेऽम्भोनिवेश ॥ २३ ॥
रमण इव सहेलं श्रीजयन्ने पुरन्ध्रे
कुवलयनयनैः श्रीर्यत्र तं पश्यतीव ।
पवनचलितवीचीबाहुभिर्नृत्यतीव
भ्रमरविरसनादैस्तद्गुणान्गायतीव ॥ २४ ॥
मधुरसविभवेन स्पर्द्धते नो धरामे-
ररुणिमसुकुमारत्वेन पाणिप्रवालैः ।
कमलवनमितीवाम्‌ययोत्पाटयन्ती-
रविशदथ जयन्तम्ना पुरस्कृत्य तत्र ॥ २५ ॥
मधुभिरिव विवृद्धैः पुण्यलावण्यपूरै-
रलिभिरिव विलोलैर्लोचनैश्चासनोभैः ।
पयसि विदधुराम्यैः कण्ठदघ्ने तदानी-
मपरकमलखण्डाडम्बरं ताम्नरुण्यः ॥ २६ ॥
अथ करजलयन्त्रैर्वारिपूरं किरद्भि
स्फुरति वियति वर्षाडम्बरेऽन्योन्यमुच्चैः ।

जललितिषु तासां प्रीतिवल्लीविलासं
कलयति स च शोषं मानमुद्राजवासः ॥ १७ ॥
शुचिरचिरुचिमुक्ताहारसौभाग्यभङ्गीं
विदधति जलधाराः कण्ठपीठे लुठन्त्यः ।
विकटकुचतटान्तःस्फारकर्पूरपूर-
प्रभवमकरिकाणां विभ्रमं चाङ्गनानाम् ॥ १८ ॥
मुखकमलविसर्पद्भूरिसौरभ्यलुभ्य-
द्भ्रमरनिकरकल्पे कुन्तलानां कलापे ।
विकचविचकिलश्रीस्फूर्तिमतं तर्जयन्ति
लितनलिनमुखीनां कान्तमुक्ताम्बुभाराः ॥ १९ ॥
तरति हृदि वहन्ती विश्वविश्वंभराया
भरमपि भुजदण्डैर्बिभ्रतं प्राणनाथम् ।
सरसि जलमगाधं कापि कान्ता न चित्रं
पृथुतरकुचतुण्डीडम्बरालम्बना हि ॥ २० ॥
पयसि लघु निलीनः कौतुकेनापकर्ष-
त्वरिहितमि[च]यान्तं दक्षयालक्षि कान्तः ।
तदनु च स तयोक्तः कोऽपि चौरोऽयमेवं
सरसविधि ववन्धे बाहुपाशेन सद्य ॥ २१ ॥
क्वचन जघनबिम्बे कापि तुङ्गस्तनान्ते
क्वचिदपि मुखपद्मे कापि कण्ठेऽम्बुपूरम् ।
प्रगुणितकरयन्त्रैरक्षिपत्प्रेयसीना
करकमलमिवाय कामकेलौ विलासी ॥ २२ ॥
बहुविधजललीलाकौतुकैः प्रीतिचित्त
पथमनुसृतवत्या श्रीजयन्तस्य सद्य ।
जलनिबिडदुकूलव्यक्तनिःशेषसाङ्ग
सरसमुदरमस्याः श्रीविलासं ससर्ज ॥ २३ ॥ (१)

मन्[illegible]मिः केसरी-
 [illegible]न्तकलैः ।
[illegible]
 [illegible] राजाः ॥ १४ ॥
[illegible]
 [illegible] तव [illegible]र् ।
[illegible]
 [illegible] [illegible]नाम् ॥ १५ ॥
[illegible]
 [illegible]मोऽभूत् ।
[illegible]
 [illegible] नो(?)[illegible]नाय ॥ १६ ॥
[illegible]
 [illegible] ।
[illegible]
 [illegible]नाम् ॥ १७ ॥
[illegible]
 [illegible] ।
[illegible]
 [illegible] ॥ १८ ॥
[illegible]
 [illegible] ।
[illegible]
 [illegible] ॥ १९ ॥
[illegible]
 [illegible]

स्मितकुसुमसमाजोत्तंसितैरिन्द्रनीलो-
पलशकलग्रगुत्थैः कुट्टिमैः साम्यमाप ॥ १० ॥
कलितमिव तमालैः कुन्तलीकुन्तलाली-
रुचिभिरिव तताभिश्चुम्बितं विश्वविश्वम् ।
स्थगितमिव समन्तादञ्जने राजपट्टै-
र्घटितमिव चकासे व्याप्तमिद्धैस्तमोभिः ॥ ११ ॥
अभिनवमृगनाभीपङ्कक्लृप्ताङ्गरागा
भ्रमररचितदुकूलैर्वेषमुद्रां दधानाः ।
मरकतकृतभूषाः पक्ष्मलाक्ष्यः सलीलं
रमणमभिसरन्ति स्वैरमिद्धेऽन्धकारे ॥ १२ ॥
सपदि दधति आतैकातपत्रं प्रभुत्वं
जगति तिमिरराजे लुप्तभूभृत्समाने ।
सरणितरुणवीरैस्तैरवस्कन्दहेतो-
रिव बहुविनिशाद्यैर्भूरिदीपैरदीपि ॥ १३ ॥
तिमिरपटलयोगं हर्तुकामो जगत्या-
स्तदनु च नयनानामोषधीशः क्रमेण ।
अमृतमयशलाकासंनिभां मन्दमन्दं
रविमुचितकलाभृत्तत्र चिक्षेप दक्षः ॥ १४ ॥
क्षितिपरिभवहेतुध्वान्तसंतानकोपा-
दिवसमधिकरागं मण्डलं तत्र राज्ञः ।
निचितमिव चकोरीचञ्चुभिर्वा मयूखै-
रुदयशिखरिचूडा चुम्बमानं चकासे ॥ १५ ॥
क्षणमदधत पूर्वाशावधूवक्त्रपद्मे
घुसृणतिलकलक्ष्मीडम्बरं चन्द्रबिम्बम् ।
तदनु किरणमुक्तामालकस्फीतशोभं
मदनधरणिभर्तुः पुण्डरीकश्रियं च ॥ १६ ॥

अभिदुरतिमिरौघम्लेच्छसङ्गाशुचित्वं
प्रशमयितुमिव ·········वामलक्ष्म्याः ।
विनिहितमिव रेजे पावनं गाङ्गमम्भः
शशिकलशविसर्पच्चन्द्रिकाचक्रवालम् ॥ ५७ ॥
तिमिररिपुजयाय प्रस्थितस्याथ राज्ञो
रुचिरकिरणवीरैः प्रोल्लसद्भिः समन्तात् ।
जगदखिलमकारि क्षिप्रमेवाविपक्षं
किमिव वसुमतां न क्ष्मातले साध्यमस्ति ॥ ५८ ॥
सह तिमिरभरेण स्वैरिणीनां प्रमोदः
प्रशममगमदुच्चैश्चन्द्रिकायां लसन्त्याम् ।
चतुरतरचकोरैयसीभिः सहाभू-
त्रिभुवननयनानां किं च पीयूषपानम् ॥ ५९ ॥
दधति मुदमुदारां कापि चञ्चचकोरी-
ध्वनिविघटिततन्द्राश्चन्द्रिकायां चकोराः ।
क्वचिदरतिमयं ते चक्रवाकाः सशोकाः
सुखमसुखमिह स्यादात्मकर्मानुरूपम् ॥ ६० ॥
मदकलकलकण्ठीकोमलः कालिमासौ
रजनिरमणबिम्बे लक्ष्यतेऽन्तर्निलीनः ।
प्रसभमपि रहस्यध्वान्तभूमनुगेत्य
क्षिप्त इव युवराजः शासितप्राणहेतोः ॥ ६१ ॥
भुवनमखिलमित्थं(स) मन्मथोऽपि प्रसादे-
ऽप्युदयमुदितराज्ये कौमुदीजीविनेशे ।
तदनु च कुसुमेषोर्मार्गणैः पञ्चसंख्यै-
र्गत भुवनविजेतृत्वंस्यना को न नीतः ॥ ६२ ॥
तिमिररिपुमयस्य प्रौढिमुल्लास्य दूरं
भुवनधामनीया चन्द्रिकामप्यद च ।

अपरदिशि चचाल क्षोणिपालायमानः
　कृतसकलविधेयो यामिनीकामनीशः ॥ ६३ ॥
विगलितवपुशोभाविभवं स्वं विदित्वा
　तदनु शिशिररश्मिर्जातविच्छायकायः ।
अपरगिरिशिरोभिः काममन्तर्हितोऽमू-
　द्विघटितविभवानां स्फूर्जितं ह्रीपदं हि ॥ ६४ ॥
अनवरतमखण्डं मण्डलं निष्कलङ्कः
　प्रथयति कमलानां काममुत्रिद्रतां च ।
अयमिति परिभाव्य क्ष्मापतेर्विक्रमस्य
　प्रविशति हिमरश्मिर्लज्जयेवाम्बुराशिम् ॥ ६५ ॥
अथ सरसविनोदैः प्रीतिमुद्भाव्य देव्या
　निधुवनरसमुद्रानिद्रया मुद्रिताक्षः ।
रतिपतिरिव रत्या गाढमालिङ्गिताङ्गः
　क्षणमिव रजनीं स क्षोणिपालो निनाय ॥ ६६ ॥
नागानां क्रमशृङ्खलारणरणध्वानैः प्रबोधक्षणे
　संपत्सुन्दरमन्दुरोदरचरद्धृसाश्च हेषारवैः ।
माद्यन्मङ्गलतूर्यवर्यनिनदप्रोद्दामलीलायितै-
　स्तस्य क्षोणिपतेः प्रियेव चतुरा निद्रामुचल्लोचने ॥ ६७ ॥
मानोत्तानतया सखीषु कलुषा प्रेङ्खोल्लोपाश्रिर
　दूनीषु स्वयमाननेऽपि दयिते यास्त्रिरे वक्रताम् ।
ताः प्रातश्चरणायुधध्वनिनिमिषादाज्ञामिवाप्य स्मर
　क्षोणीशस्य समुत्सुका प्रियपरीरम्भं स्त्रियस्तन्वते ॥ ६८ ॥
विस्तोराम्भोजराजीमधुरमधुरमयानरशार्मिलषा
　यावद्भृङ्गानुयाता सुरभिमुगनम पादपासन्नैयन्त ।
प्रातः शाखेषु मान्या मदननरपतेर्वर्तन्ते वातास्तु पने
　रत्यन्तश्रान्तवातामनवरतपरिनर्मदमास्वादयन्त ॥ ६९ ॥

माद्यन्मण्डलचक्रवालकलितं स्येयः सुखश्रीकरं
संख्यातीतरथाश्च वैभवपदं नक्षत्रलोपावहम् ।
शङ्के सूरमपूर्वमीक्षितुमयं त्वं कौतुकीवाधुना
पूर्वक्ष्माधरमारुरोह नृपते पाथोजिनीवल्लभः ॥ ७० ॥
मद्वल्लभां कैरविणीमुपेत्य चुम्बन्त्यमी रागवतेति राज्ञा ।
आमोचयत्यङ्कजगुप्तिनद्धान्मित्रः प्रभाते वसुभिर्द्विरेफान् ॥ ७१ ॥
द्वारे तिष्ठति ते नरेन्द्र सुभग श्रीराजितं राजकं
सेवां कल्पतरोरिवेप्सितफलां हर्षाच्चिकीर्षच्चिरम् ।
सद्यो भूषयितुं तदर्हसि मणिभ्राजत्सभामण्डपं
जज्ञे मङ्गलपाठकोदितगिरामित्थं विलासस्ततः ॥ ७२ ॥
(पञ्चभिः कुलकम्)

स्मरविलसितवर्यां तां परित्यज्य शय्यां
करतलमवलम्ब्य स्वप्रतीहारिकायाः ।
जयनयजयशब्दैः सार्धमुत्थाय भेजे
प्रचररुचि सभायां रत्नसिंहासनं सः ॥ ७३ ॥
अथैत्य विनमच्छिरोमुकुटकोटिरत्नाङ्कुर-
स्फुरत्किरणकोरकोत्करकरम्बिताङ्घ्रिद्वयम् ।
क्षमायुवतिवल्लभैः सकलराजलोकैः समं
स विश्रुतपराक्रमः प्रणयतः प्रणेमे प्रभुः ॥ ७४ ॥
दृष्ट्वा प्रमदाधिनमिशिताग्ने प्रभो पुरस्तादुचितासनस्था ।
चक्रुः श्रिया धाम्नि तदास्यचन्द्रे लीनं चकोरोपमयात्मचक्षुः ॥ ७५ ॥
इति श्रीमन्महाकवि[illegible] महाकाव्ये [illegible]
[illegible]दयोऽष्टम सर्गः ।

नवम सर्गः ।

अथ सुता विश्वमहीश्वरस्य प्रशासतः [illegible]रेशितुः ।
[illegible] प्रसन्नः [illegible] सदा [illegible]वर्द्धनकमे ॥ १ ॥

सदोदयैस्तस्य विभूतिसंचयैः पचेलिमैः पुण्यतरोः फलैरिव ।
उपायनीभावमुपागतैः स्वयं न कश्चमत्कारमपारमभ्यगात् ॥ २ ॥
परेद्यु विद्योतितसर्वदिङ्मुखे कृतासनो रत्नमयासने नृपः ।
जयन्तमुख्यैः परिवारितो जनैर्ददर्श कंचिद्गजराजमग्रतः ॥ ३ ॥
समाययौ यस्य मिषेण जङ्गमः क्षमाभृतस्तस्य हिमाचलः किल ।
समुन्नतिं द्रष्टुमिवातिकौतुकादनन्यसाधारणतामुपेयुषीम् ॥ ४ ॥
यदीयकुम्भस्थलतल्पशायिनीभवन्मदाम्भस्तटिनीतटाश्रितैः ।
मधुव्रतैः सान्द्ररवैः कदाचिदप्यवापत स्वापसुखं समुद्रजा ॥ ५ ॥
उदारजाम्बूनदभूरिभूषणैर्ज्वलन्मणिश्रेणिशिखाविभूषितैः ।
क्षपा क्षणोल्लासि महौषधीरुचि हिमाचलं गौरवपुर्जिगाय सः ॥ ६ ॥
स्वरार्तकान्तानघनाघलावली चलाचलेन श्रवणद्वयेन यः ।
बभौ नभोलम्बनलोलपक्षवानिवेन्द्रहस्तीन्द्रयुधे कृतोद्यमः ॥ ७ ॥
विसारिसिन्दूरपरागपिञ्जरं समुन्नतं कुम्भतटं च धारयन् ।
पिधानशृङ्गस्य नवार्ककान्तिभिर्बिभर्ति यः पूर्वमहीभृतः श्रियम् ॥ ८ ॥
(कुलकम्)
तदन्तरे श्रोत्रसुखैकपारणामिवादधद्भूमिपतेर्जनस्य च ।
वचो वरादित्युदियाय दैवतं तवैष भावी खचरेश्वरः सुतः ॥ ९ ॥
शुभोदयादस्य वशंवदात्मना मयार्पितोऽद्यैष चकास्तु कुञ्जरः ।
उदन्वता श्रीकुचकुम्भलालित हरेर्यथा वक्षसि कौस्तुभो मणिः ॥१०॥
अथ गज सिंहलपेशभूपतेरमहुरैस्मै मुहूर्ते समाहृत ।
गृहाङ्गणं प्राप मम प्रभावतो गृहाण न भो निगृहाण विद्विष. ॥ ११ ॥
शशाम यावत्तदमानव वचो महीपतिस्तावदिनेन्द्रमात्मना ।
सुगन्धधूपप्रसवैरपूजयज्जयास्पद चक्रिकान्तु चक्रभृत ॥ १२ ॥
वचोहर [illegible] ।
सभा [illegible] ॥ १३ ॥
नृप [illegible] वचोहर ।
त्वदन्तिकं प्राप मम प्रभा [illegible] ॥ १४ ॥

समञ्जसं मञ्जयकुञ्जरः स नस्तनोति नेत्राम्बुजकौतुकं तव ।
अवैमि तस्मिन्न च लोभसंभवं पयः प्रवेशे कलमा स्पृहाम्बुधेः ॥१५॥

सुहृत्त्वमाविष्कुरु सिंहलेश्वरे त्वमत्र तन्वेशगतो विशेषतः ।
विजृम्भितानिःस्पृहणीयतोद्भवं यशस्त्वयास्त्वद्भुतमुत्सवं हि ते ॥ १६ ॥

गजेन्द्ररत्ने गृहमागते स्वयं महीभुजः कस्य मनो न लुभ्यति ।
तथापि हेयः स बलीयसस्त्वया न सुन्दरः काम्यसमानविग्रहः ॥ १७ ॥

विपर्यये वल्गति लोभसंभवः क्षमाभुजां दाव इव क्षमारुहान् ।
प्रमादतस्तत्र कृतोऽपि स त्वया समुच्छ्नतां नीतिवधूविलासिना ॥१८॥

रदक्षमाणां निपुणः प्रकाशयत्नोऽपि नैर्मल्यनिवासचेतसः ।
वचोभिरक्लिष्टमना यथागुणैर्वचोहरस्योत्तरयांबभूव सः ॥ १९ ॥

इमां यदस्मासु स सिंहलेश्वरः प्रभुस्तव स्नेहविशेषवर्णिताम् ।
उवाच वाचं तदर्दशतामुना छटात्मसौजन्यमहोदधेरियम् ॥ २० ॥

ममाङ्गणालंकरणं करीश्वरः सहेलमागत्य बभूव यः स्वयम् ।
तथार्पितो देवतया प्रसन्नया स दीयते चेद्भुवना तदा न किम् ॥२१॥

सुहृद्वृतः प्रेषयितुं न युज्यते ममैष राजन्तव मेदिनीपतेः ।
न चेदिदं प्रेषयता स संप्रति स्वकीयराज्यं समस्तमृद्धिभिः सुहृद् ॥२२॥

नयागते वस्तुनि राज्यभूषणे समर्पिते दूतमुखेन कस्यचित् ।
रणाक्षमत्वप्रभवा हि भूभुजा भवेदकीर्तिर्न कथं गरीयसी ॥ २३ ॥

मुमोच यं दिव्यगजेश्वरं न्यय पविश्रुभाग्राज्यवियोगभूचकम् ।
प्रभोऽस्तु वा पुण्यवतस्त नस्य का वस्निष्टतैव कतमश्च विग्रहः ॥२४॥

प्रसेदुषी यस्य बभूव देवतार्पितद्विपेन्द्रा स बलीयसा धुरि ।
मदोद्धतः सूक्ष्मविधृतयान्ववर्धास्युत्कलोम. पतिरेव तावकः ॥ २५ ॥

जगाद दूतः पुनरग्मनायकप्रभुत्वशंसीनि यथा वराघव ।
असंख्यहस्तीन्द्रवनोऽपि हस्तिन परे ग्रहे ते कतमो ममाग्रहः ॥२६॥

मृगेक्षणाना मरम समागमे स कण्टकत्वं न तु राज्यसंपदः ।
भविष्यतीनस्तु वदन्नुपायनात्प्रसेदुषः सिंहलभूभुजं गतः ॥ २७ ॥

न किंचिदूनं करिणामुना विना प्रभोर्मदीयस्य तथापि स द्रुतम् ।
गृहिष्यते तं हठ····(?) सुबाधियः श्रिया सहासाधरुषां धुरंधरः ॥२८॥
नरेन्द्र बुध्यस्व धियालनोऽथवा महेन्द्रमन्त्रिप्रतिमस्य मन्त्रिणः ।
मम प्रभो मेपय कुञ्जराधिपं प्रजास्य कोपार्चिषि मा पतङ्गताम् ॥२९॥
तरङ्गितान्तःपृथुकोपपावकारुणेक्षणेन क्षितिपेन नोदितः ।
ध्रुवा जयन्तोऽथ वचस्विनां गुरुर्जगाद तं दूतमभूतसंभ्रमः ॥ ३० ॥
महानिधीनामधिपोऽपि चक्रभृत्त्वयागतं वस्तु न जातु मुञ्चति ।
मतङ्गजस्यास्य मिषात्स्वमन्दिरे रमा प्रविष्टा क्रियते कथं बहिः ॥३१॥
विभोर्मेमाजौ विषमायुधाधिकप्रहारपात्रीकृतविग्रहस्तव ।
भविष्यतीशो नवसंगमे वधूजनो यथोत्कण्टककम्पसाध्वसः ॥ ३२ ॥
द्विपो न पोष्याः प्रणिपातमन्तरा निजैः पदार्थैरिति भूभृतां नयः ।
न जातु तेषां तमपश्यतां भवेज्जनाद्विशेषः फणिदुग्धपायिनः ॥ ३३ ॥
मदेन मत्तस्तव मेदिनीपतिर्द्विदं ततोऽस्याजनि मन्दता धियः ।
गिरोऽप्यसभ्याः प्रचरन्ति ताः परं यतः कृतोत्साहपरंपराः परे ॥३४॥
मयि द्विपार्पणसंभवाः कुधस्तवैव नाथस्य विनाशहेतवः ।
स्वतः प्रभूता निधनं धनंजयज्वलच्छिखाः किं न नयन्ति शाखिनम् ॥३५॥
न लभ्यते सद्मसमाश्रित स्वय महात्मना नीतिरियं गरीयसी ।
पुरापि मैनाकमवाप वीक्षितु न गोत्रभिद्वारिधिमध्यमाश्रितम् ॥ ३६ ॥
सुमेरुभास्वो खनित खनित्रता खगागदष्टाशिखैरुपागते ।
न दन्तभङ्गादपर फल यथा तथा द्विपामप्युपमर्पिनामिह ॥ ३७ ॥
निशम्य निन्दामथ भर्तुरात्मन परिस्फुरत्कोपभरारुणेक्षण ।
जगाद दूत क्षितिनाथनन्दन प्रकम्पसम्पर्कचलात्तराधर ॥ ३८ ॥
निपीड्य दोर्दण्डबलेन नत्र्युद्विपाधिराज सह राज्यसम्पदा ।
न यावदादास्यति तावदस्य ते प्रभो प्रतीतिर्न भविष्यति ध्रुवम् ॥३९॥
द्विधापि बालोऽसि कुमार निश्चितस्त्वमज्ञनोद्गारगिरा प्रपञ्चन ।
अगण्यदोषो विदुषा ततोऽधुना स्वमानन सुद्रय मौनमुद्रया ॥ ४० ॥

गतामहत्त्वं जय कुञ्जरां पुरो विधाय सर्वस्वमुपायनीकुरु ।
प्रसादनायास्य जिजीविषुर्यदि प्रसेदुषो राज्यमितो लभस्व ॥ ४१ ॥
गिरा तदारुंतुदया सदार्दितः सुतः स दूतस्य जगाद भूपभूः ।
हरिः स कूपस्य परं यदीयया कुशिक्षया ते सजलातिशायवाक् ॥ ४२ ॥
मुधात्र किं ताण्डवडम्बरैर्गिरां मदीयभूभृद्दलवल्गु वल्गितम् ।
सितासिधाराम्बुनिमज्जितारयो निवेदयिष्यन्ति महाजिभूमयः ॥ ४३ ॥
हरेर्मदीयप्रहितास्त्रदुःसहे रणक्षणे दर्शनिशीव चन्द्रमाः ।
अवस्थितिं नो कलयापि लास्यतीत्यवेत्य तस्मै विनिवेदयद्रुतम् ॥ ४४ ॥
सदात्यया वह्निरिव क्रुधा ज्वलन्समेत्य नत्वा च हरिं नरेश्वरम् ।
मुखस्य विच्छायतयैव सूचयन्व्यजिज्ञपत्कार्यमसिद्धमात्मनः ॥ ४५ ॥
नृपाधिराज द्विपराजमञ्जसा न मुञ्चते हन्त कथंचनापि सः ।
फणीश्वरः स्फारफणामणिं क्वचिज्जहाति जीवन्न हि दर्पदुर्द्धरः ॥ ४६ ॥
रिपोः स्वरूपं विनिवेदयिष्यति स्फुटार्थमेतन्मयि मा रुषं कृथाः ।
महीभृतां सत्यगिरो हि सेवकाः प्रसादपात्रं पुरतो हितैषिणम् ॥ ४७ ॥
परत्र वीरे नरवीर का कथा न शङ्कते जातु पुरंदरादपि ।
प्रचण्डदोर्दण्डबलावलेपतस्तृणाय न त्वामपि मन्यते प्रभोः ॥ ४८ ॥
न पुण्यलक्ष्मीजरसेव जर्जरा तवेश रक्षासु विचक्षणा ततः ।
गजेन्द्रवद्राज्यमिदं हरिष्यते तदीयपुण्यैः सुभटैरिवोद्भटैः ॥ ४९ ॥
निशम्य दूतादिति दुःश्रवं वचः प्रणष्टतत्त्वार्थविचारणः क्रुधा ।
समूलकाषं कषितुं स विद्विषं समुद्ययौ तार्क्ष्य इव क्षणात्खगः ॥ ५० ॥
विधेर्विबुध्य प्रतिकूलकारितां गजेन्द्रनाशप्रकटीकृतां ततः ।
स मन्त्रिभिर्नीतिपथैकशालिभिर्न्यवारि तेन द्विपनाशिना नृपः ॥ ५१ ॥
तथाप्यवज्ञाय तदीयमन्त्रितं प्रयाणमाधत्त मदोद्धतस्ततः ।
अरिष्टमग्रे नितमृत्युरप्यसौ विरुद्धचेष्टैर्मतिनव्यनायथा ॥ ५२ ॥
(अथ कुलकम्)
विशोटकर्माणिनर्त्तावर्त्तानि मदाभिषिक्तानि करामशीकरः ।
विमुच्छितान्यस्य भयेन दिग्गजान्प्रजानि शालन्यधिपस्य शंसित ॥ ५३ ॥

नृपोऽसहिष्णुः परभूरमण्डलं जगाम दूरोऽयमितीव सर्वतः ।
यदीयतुङ्गतुरगाः पुरोद्धतैर्धरापरागैः स्थगयन्ति तत्पथि ॥ ५४ ॥
जलाशयाभिर्जलतामिवानयन्नगाधनीरैरनिनीरधीरपि ।
मुहुर्मुहुर्मज्जनपानगाहनैरनीकभूयिष्ठतया नदा पथि ॥ ५५ ॥
धराभुजङ्गध्वनुरङ्ग·······तरङ्गभङ्ग्येव तरङ्गिणीपतिः ।
असीमसामन्तमहर्द्धिडम्बरः प्रयाणभेरीरवपूरिताम्बरः ॥ ५६ ॥
स्वदेशसीमानममानमानभूः समाससाद क्रमशः स विक्रमः ।
हरिर्नरेशः सरसाङ्कितामिव क्षितिं द्विपदन्तिपटाविघट्टनः ॥ ५७ ॥
अथो जयन्तीश्वरचारपूरुषः समेत्य भूपं विधिना व्यजिज्ञपत् ।
विभो रिपुस्ते हरिराययौ स्वयं स्वदेशसीमानमसीमसेनया ॥ ५८ ॥
रमाकुचस्पर्शसुखेन शायिनं मुकुन्दमप्यम्बुनिधौ विविस्मयन् ।
निदेशतो विक्रमसिंहभूपतेः प्रयाणभेरीध्वनितं ततोऽभवत् ॥ ५९ ॥
मयि स्थिते हन्त निदेशवर्तिनि स्वयं प्रयासः कतमः प्रभोरिति ।
समुत्सहिष्णुः समराय राजसूर्व्यजिज्ञपन्मधिमुखेन भूभुजम् ॥ ६० ॥
द्विपत्नरेन्द्रस्य हरेः पराजयो रणाङ्गणे यदुवराजतोऽभुतः ।
तदैव तद्देव यशःप्रशस्तये त्वदीयमूर्त्यन्तरमूर्जितं हि सः ॥ ६१ ॥
प्रयातु तज्जेतुमनेकशक्तिभृज्जयी कुमारोऽभिनवस्त्वदाज्ञया ।
प्रभाकरस्यापि विभो भवेदिदं विभाकरः किं न तमस्तितिच्छिदे ॥६२॥
विमृश्य विज्ञप्तिमिति क्षितीश्वरः समञ्जसां चेतसि सर्वसंविताम् ।
हरेर्विधातुं परितः पराजयं जयन्तमाज्ञापयति स्म सस्मय ॥ ६३ ॥
उदात्तवीरव्रतनीतिभूषणं रणाय नम्रक्षितिपालमण्डलीम् ।
कृतप्रसादां सह गन्तुमादिशत्तन. कुमारेण जिगीषुना द्विष ॥ ६४ ॥
समूलमुन्मूलितवैरिपादपे हरीषितु सिंहराजकुञ्जरे ।
ततः कुमारः क्षितिभृन्निदेशतः समीरितार्थोय तदोपचक्रमे ॥ ६५ ॥
विशिष्टवेषाभरणैर्महावती स वीरबालानन्दनसीमिवारभत् ।
पितुः प्रणम्यैव पदौ तदाशिषं जयश्रियः सिद्धिविशारदे ततः ॥६६॥

शुभे मुहूर्ते जयकुञ्जराधिपं रणे जयं मूर्तमिवाधिरूढवान् ।
स चामरग्राहिकुरङ्गचक्षुषां बभौ कटाक्षैरिव चामरैः सितैः ॥ ६७ ॥
स विक्रमक्षोणिधवान्वयाम्बरप्रभाकरः प्रीणितबन्धुपङ्कजः ।
द्विगुणितकलभृङ्गारावगर्भं नभस्तः ।
शिरसि सुरकराजप्रेरितं पुष्पवर्षं
न्यपतदवनिभर्तुर्मङ्गलोद्गारसारम् ॥ १०७ ॥

पुरमथ रथनूपुराभिधानं गगनचरैः परिवारितः प्रविश्य ।
समनत निजपौरुषोपनीतामवनिपतिः खचराधिराजलक्ष्मीम् ॥ १०८ ॥

तदनु विनयवामना नरेन्द्राः खचरपतेरनुजीविनः प्रणम्य ।
अवनिपरिवृढं किरीटकोटीघटितकराः शिरसा दधुस्तदाज्ञाम् ॥ १०९ ॥

विलेभे विषयान्सद्यस्तेषामपि महीपतिः ।
न नाम महतां सेवा भजते जातु वन्ध्यताम् ॥ ११० ॥

राज्याभिषेकमनुभूय नभश्चरेन्द्र-
सूनुं निदेशगतमत्र निवेश्य यानम् ।
श्रीमान्स वायुगतिसंनिहितोऽधिरुह्य
स्वं राज्यमम्बरचराधिपतिः प्रतस्थे ॥ १११ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते श्रीजयन्तविजयनाम्नि महाकाव्ये श्रीमदङ्के
आयुधवर्णनो नाम चतुर्दशः सर्गः ।

पञ्चदशः सर्गः ।

इतश्च सुस्थितः सूरिः श्रीजयन्त्यां समाययौ ।
निजै रराज यः शिष्यैः कल्पशाखीव पल्लवैः ॥ १ ॥

मूर्तिमानिव यो धर्मः कुलशान्तेरिवामलम् ।
कृपावरेण्यपण्यश्रीलाभ्यलीलैकरङ्गभूः ॥ २ ॥

उद्यतीव तपस्तेजः सौमत्वं च परं दधत् ।
यो बभौ मिथिते सह पुष्पदन्तद्वयैरिव ॥ ३ ॥

यः केवलावलोकेन विरेजे सदायद्युता ।
व्योमेव व्योमरत्नेन ध्वान्तध्वंसपटीयसा ॥ ४ ॥

मधुरोदितविशेषोऽपि तस्यार्थं विदुर्गांम्बदीः ।
जायते जनता चित्रं यस्य नेदं विस्मयः ॥ ५ ॥

मुत्पूर्वी समवसारे निर्मापिते मरुत्पतिः ।
गता त्रिजगदिरुले सदने मानिस्तरः ॥ ६ ॥
तत्र धर्मज्योतिर्मौलिमालमण्डप ।
भानव्य सर्वजाभेव सनातैमे स देशनाम् ॥ ७ ॥
सार्वगर्भांस्मलीन समस्तान्नवैभवः ।
श्रीसर्वज्ञार्थे देवः सभां निःश्रेयस श्रिये ॥ ८ ॥
तत्रागमोऽस्मानिश्वयः गुणाशुध गुरुर्गतः ।
यतः पारीणता यान्ति जन्तवः संसारवारिधेः ॥ ९ ॥
ओकरूपः पूर्वीनवेर्पैसां जीवदयामयी ।
यो मनोरमवल्लीनां स्पर्द्धते निजशाखैः ॥ १० ॥
जैन जनस्य दानानि धर्मकर्म चतुर्विधम् ।
राजमैन्यमिवानन्यदुन्तगारि जयश्रिये ॥ ११ ॥
मुगतिश्रेयसी पुंसां शोभतीति वशंवदा ।
जृम्भमाणे जिनेन्द्रोक्तधर्मकार्मणकर्मणि ॥ १२ ॥
इति देशनया सूरेर्मिथ्यात्वममुचन्नृपः ।
नि:शङ्कं पङ्कपङ्कं शारदेव सरिज्जलम् ॥ १३ ॥
श्रद्धासमृद्धिसंबन्धबन्धुरो धरणीधव. ।
श्राद्धधर्मधुराधौरेयत्वमभाजत ॥ १४ ॥
अत्रान्तरे द्विज. कश्चित्पाण्डित्यमदमेदुरम् ।
वाचमुल्लासयामास सर्वज्ञाभावसिद्धये ॥ १५ ॥
मत्सरो नात्र मे राज्ञा सर्वज्ञो मन्यतेऽद्य यत् ।
अप्रमाणेन तेनायं किं श्वेतैर्विप्रतारित. ॥ १६ ॥
सर्वज्ञो नास्ति यद्ग्राह्य प्रमाणै' पञ्चभिर्न स' ।
यदेव तद्भवेदेव यथा व्योमसरोरुहम् ॥ १७ ॥
[1].... ' रम्याङ्गहारिण्यो यथा रूप मृगीदृश' ।
विलोकते तथा चक्षुः सर्वज्ञस्य न जातुचित् ॥ १८ ॥

[1] 'मनो' इति स्यात्.

वधूनामधरस्येव मधुरां मधुसंपदम् ।
नैव सर्वज्ञतां जातु गृह्णीते रसनेन्द्रियम् ॥ १९ ॥
——गमादिसंदर्भगर्भसौभाग्यभूषणम् ।
...भर्तानिवादत्ते श्रोत्रं सर्वज्ञतां नहि ॥ २० ॥
...गरकस्तूरीविचित्रकुसुमोद्भवम् ।
...रम्यमिव नादत्ते सर्वज्ञं घ्राणमिन्द्रियम् ॥ २१ ॥
...र्वज्ञोऽस्तीति न ज्ञानं स्पृशति स्पर्शनेन्द्रियम् ।
...बुद्धीन्द्रियाभिधानाङ्गसमाङ्गो जातु धीधनः ॥ २२ ॥
प्रत्यक्षं पञ्चधाप्येवं सुधासर्वज्ञसाधने ।
सत्प्रतिष्ठाविधौ मानं जातु मानं च चल्गति ॥ २३ ॥
लिङ्गेन लिङ्ग्यते लिङ्गी साध्यधर्मविभूषितः ।
अविनाभावसंबन्धं संबन्धेन च नात्र तत् ॥ २४ ॥
सर्ववित्तोपमानेन प्रमाणेनैव गृह्यते ।
प्रवर्तते हि सादृश्यात्तद्गोगवययोरिव ॥ २५ ॥
परेषां नागमेनापि सर्ववित्साध्यते बुधैः ।
अन्योन्याश्रयदोषो हि निर्विवादोऽत्र वादिनाम् ॥ २६ ॥
नार्थापत्तिप्रमाणं च सर्वज्ञास्तित्वसिद्धये ।
तत्र साध्या विनाभावभावो यत्रास्ति कश्चन ॥ २७ ॥
प्रमाणपञ्चकस्यैवं सर्वज्ञो नास्ति गोचरः ।
तदभावप्रमाणेनाभावस्तस्येति मन्यताम् ॥ २८ ॥
अनुज्ञया गुरोस्तस्य क्षुल्लको वादिसत्तम. ।
प्रतिवादिवचोऽनूद्य दूषयामास वादिनः ॥ २९ ॥
न सर्वज्ञः प्रसिद्धस्ते साध्यधर्मीह साधने ।
अप्रसिद्धविशेष्याख्यं पक्षदोषः स्फुटस्ततः ॥ ३० ॥
हेतुमप्याश्रयासिद्धहेतु……दूषितम् ।
अन्धुमन्ध इवामेऽपि दुरहे त्वं न पश्यसि ॥ ३१ ॥

निजाकारेण साकारे तत्र नार्थावभासनम्।
प्रसज्येत पराकारदरिद्रं तद्यतो मतम् ॥ ५८ ॥
अथार्थैरर्पिताकारे तत्र विश्वस्य शून्यता।
प्रसज्यते ततो ज्ञानं तत्र गोचरयत्वदः ॥ ५९ ॥
अर्थैः समर्पिताकारैरनन्तैस्तत्समाकुलम्।
सजातीयविजातीयभेदनिर्नो(र्णो)यकं कथम् ॥ ६० ॥
अत्रोच्यते त्वयोद्दिष्टा दोषा ज्ञाने हि कोऽपि न।
अर्थग्रहणरूपेण परिणामि हितं मतम् ॥ ६१ ॥
ततोऽनन्तस्वभावत्वादनन्तार्थोपलम्भकम्।
ज्ञानं सिद्धमितः सिद्धिः सर्वज्ञस्येति मन्यताम् ॥ ६२ ॥
निर्जिते मुनिना वादे निग्रहस्थानमागतः।
निर्भर्त्स्य मत्सरी राज्ञा स ततो निरकास्यत ॥ ६३ ॥
प्रशशंस विशामीशस्ततस्तं वादिनं मुनिम्।
इत्थं प्रभावना जज्ञे त्वचोऽद्य जिनशासने ॥ ६४ ॥
विकल्पजालकल्लोलैर्जल्पकल्लोलिनीपतौ।
पातालप्रणयिन्यत्र धीरभूत्तस्य वादिनः ॥ ६५ ॥
मुनेऽद्य मौनमुद्रास्ये वैलक्ष्यं वास्य वादिनः।
ददे त्वयाददे वाशु जल्पकौशलजं यशः ॥ ६६ ॥
अथ विद्याधरः कश्चिदवतीर्य विमानतः।
मुनिं नत्वा नृप चास्य व्यजिज्ञपदनिप्रियम् ॥ ६७ ॥
योऽपजह्रे सुतस्तेऽसौ वैताढ्यं सानुकूलया।
चक्रे देवतया राजकन्येशश्चक्रवर्त्यपि ॥ ६८ ॥
सोऽयमायाति भूमीन्द्र प्रसाध्य जगतीमिद।
जयन्तः स्वभुजप्राप्यशौर्यनिर्जितशात्रवः ॥ ६९ ॥
गुरुश्रोतस्विनीस्रोतः श्रुतं वारीव शीतलम्।
राज्ञोऽथ तद्वचोऽशास्य तापं पुत्रवियोगजम् ॥

अभूदवीचिभिः ग्रातः सखेदं सुतवार्तया ।
दिदृक्षुरक्षिपक्षुम्नं ततः स नमस्तले ॥ ७१ ॥

आययौ खेचरश्रेणिचक्रवर्तिश्रियः प्रियः ।
विमानैः पूरयन्नाशा मुदा च नयने पितुः ॥ ७२ ॥

जिनेन्द्रमिव देवेन्द्रः समुत्तीर्य विमानतः ।
नमश्चक्रे नमस्याईं श्रीजयन्तो गुरुं ततः ॥ ७३ ॥

आश्चर्यैकपदैर्गुणैस्त्रिभुवने भ्राम्यद्यशःसौरभै-
स्तैस्तैरभ्युदयैरसौ····सुकृतप्रागल्भ्यलभ्यैर्मुदाम् ।
दिग्यात्रासु जयैश्च तस्य जनको नारञ्जि राजा तथा
श्लाघ्यैः श्रीजिनधर्मकर्मभिरपि प्रीत्या गृहीतैर्यथा ॥ ७४ ॥

पितुः स विद्याधरचक्रवर्ती सुधावकत्वेन गुणी गुणेन ।
तदा कुमारोऽपि मुदम्बुपूरैः समुद्रमुद्रां बिभरांबभूव ॥ ७५ ॥

मुखालोकैः प्रौढप्रणयसुभगैस्तस्य सुगुरोः
कृतार्थीकुर्वाणो नयननलिने भूपतिरथ ।
पदोरर्चां कृत्वा मणिमुकुटदीप्तांशुकुसुमै-
रलंचक्रे शक्रानुज इव विभूत्या स सदनम् ॥ ७६ ॥

सर्वत्र क्षितिमण्डले क्षितिधवैः श्रीविक्रमक्ष्मापते-
रादेशेन विनिर्मिताद्भुततमा जैनेन्द्रहर्म्यावलिः ।
उन्मीलन्मणिकिंकिणीक्वणमिषादाख्यातुमभ्युद्यते
वामादद्भुतपुण्यकीर्तिपटला कान्ता प्रभुत्वाश्रया ॥ ७७ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीजयन्त-
नरेन्द्रसम्यक्त्वप्रतिपत्तिवर्णनो नाम पञ्चदशः सर्गः ।

षोडशः सर्गः ।

अन्यदा सदसि राजशासनाद्वेत्रिणा सपदि संप्रवेशितः ।
विक्रमक्षितिपतेः पुरः · · · ·   ॥ १ ॥

निजाकारेण साकारे तत्र नार्थावभासनम् ।
प्रसज्येत पराकारदरिद्रं तद्यतो मतम् ॥ ५८ ॥
अथार्थैरर्पिताकारे तत्र विश्वस्य शून्यता ।
प्रसज्यते ततो ज्ञानं तत्र गोचरयत्तदः ॥ ५९ ॥
अर्थैः समर्पिताकारैरनन्तैस्तत्समाकुलम् ।
सजातीयविजातीयभेदनिर्ना(र्णा)यकं कथम् ॥ ६० ॥
अत्रोच्यते त्वयोद्दिष्टा दोषा ज्ञाने हि कोऽपि न ।
अर्थग्रहणरूपेण परिणामि हितं मतम् ॥ ६१ ॥
ततोऽनन्तस्वभावत्वादनन्तार्थोपलम्भकम् ।
ज्ञानं सिद्धमितः सिद्धिः सर्वज्ञस्येति मन्यताम् ॥ ६२ ॥
निर्जिते मुनिना वादे निग्रहस्थानमागतः ।
निर्भर्त्स्य मत्सरी राज्ञा स ततो निरकास्यत ॥ ६३ ॥
प्रशशंस विशामीशस्ततस्तं वादिनं मुनिम् ।
इत्थं प्रभावना जज्ञे त्वचोऽद्य जिनशासने ॥ ६४ ॥
विकल्पजालकल्लोलैर्जल्पकल्लोलिनीपतौ ।
पातालप्रणयिन्यत्र धीरभूत्तस्य वादिनः ॥ ६५ ॥
मुनेऽथ मौनमुद्रास्ये वैलक्ष्यं वाम्य वादिनः ।
ददे त्वयाददे वाग्नु जल्पकौशलजं यशः ॥ ६६ ॥
अथ विद्याधरः कश्चिदवतीर्य विमानतः ।
मुनिं नत्वा नृप चास्य व्यजिज्ञपदतिप्रियम् ॥ ६७ ॥
योऽपजह्रे सुतस्तेऽसौ वैताढ्य मानुकूलया ।
चक्रे देवतया राजकन्येशश्चक्रवर्त्यपि ॥ ६८ ॥
सोऽयमायाति भूमीन्द्र प्रमाध्य जगतीमिह ।
जयन्तः स्वभुजप्राप्यशौर्यनिर्जितशात्रवः ॥ ६९ ॥
सुरस्रोतस्विनीस्रोतः सुतं वारीव शीतलम् ।
राज्ञोऽथ तद्वचोऽप्यास्य तापं पुत्रवियोगजम् ॥ ७० ॥

अस्ति हास्तिनपुरं भवसुराम्नातिदूरभुवि देव विश्रुतम्।
येन दक्षिण[दि]गङ्गनामुखाम्भोरुहे तिलकचारुता दधे ॥ २ ॥
चन्द्रकान्तमणिसान्द्रकान्तिभिर्यज्जिनेन्द्रसदनैर्मनोरमैः।
स्वं पुरीमिव हसत्यनुक्षणं गोत्रभिद्विहितनीतिसंपदम् ॥ ३ ॥
यत्र वेदमुखरा द्विजातयः सप्तमीं भवनभूमिमाश्रिताः।
संवदन्ति निजवासनोद्गतं कुम्भजन्ममुनिना सहान्वहम् ॥ ४ ॥
पालयत्यवनिपालमण्डलीमौलिलालितपदस्तदद्भुतम्।
वैरिसिंह इति वैरिसुन्दरीलोचनाञ्जनतमिस्रभास्करः ॥ ५ ॥
स्फारपुष्करकदम्बचुम्बिता यस्य खड्गलतिका कराम्बुजे।
युद्धनाशितहतावनीभृतामवर्णवहिकाश्रियं दधे ॥ ६ ॥
भाग्यसंपदिव पुष्पधन्वनः सृष्टिसारमिव पद्मजन्मनः।
तस्य देव कमलेव वारिधेरद्भुतास्ति रतिसुन्दरी सुता ॥ ७ ॥
तत्स्वयंवरविधानकौतुकोत्साहदर्शनसमीहया नृपः।
रूपयौवनमदाभिमानिनः सर्वतः क्षितिपतीनजूहवत् ॥ ८ ॥
किंतु सन्तु शतशः परे नृपा रूपसंपदधिकाभिमानिनः।
श्रीजयन्तमपहाय नापरस्तन्मनोन्तरधिकं विजृम्भते ॥ ९ ॥
वाचमेवमवनीपुरंदरः सुन्दरामथ निपीय सादनम्।
तत्क्षणं कृतयथोचितक्रियं राजदूतमवदत्प्रमोदतः ॥ १० ॥
इत्थमस्ति यदि दूत नूतनस्नेहमोहितमना महीपतिः।
श्रीजयन्तमवलम्बितक्रमं प्रेषयामि सममेव तत्त्वया ॥ ११ ॥
समतेन निजगोत्रमन्त्रिणा वासरेऽभ्युदयशालिनि द्रुतम्।
श्रीजयन्तमथ स व्यसर्जयद्भूरिसैन्यभरभङ्गुरावनिम् ॥ १२ ॥
दुन्दुभिध्वनिभरेण रोदसी पूरयन्नपरिमेयविस्तरः।
सोऽचलद्बलविमर्दरेणुभिर्दर्शयन्नहनि दर्शयामिनीः ॥ १३ ॥
अध्वनि प्रतिदिनं स नूतनैः कौतुकैस्तरललोचनाञ्चलः।
वासरैः परिमितैरपि द्रुतं प्राप हास्तिनपुरं नरेश्वरः ॥ १४ ॥

1. 'भवं सुराम्ना' इति पाठे सुगमं सम्बोधनम्

तं समागतमवेत्य पूर्ववैरिसिंहनृपतिः प्रमोदवः ।
संमुखं निखिलसैन्यसंचयन्यञ्चितावनितलस्तदाचलत् ॥ १५ ॥
तत्क्षदिग्गुरुदर्शी समन्ततस्तत्र तौ क्षितिपती वितेनतुः ।
····वितीमथ मिथः प्रथीयसा गौरवेण गुणरत्नरोहणौ ॥ १६ ॥
भूपतिस्तदनु भूरिभक्तिकृति प्रीतिमप्रतिमरूपसंपदम् ।
श्रीजयन्तयुवराजमादरा[दा]निनाय निजमुद्भुजं पुरम् ॥ १७ ॥
भूरि पौरजरतीकरक्षणगाजलाञ्छितशिरः शिरोरुहः ।
तत्र सत्वरनरेन्द्रदर्शिते वेश्मनि स्थितमुख्यः स तस्थिवान् ॥१८॥
हर्षनिर्भरमहीभृदाहृताविष्पगुस्थितवपुः परि······· ।
···दः ॥ १९ ॥
बन्दिवृन्दनिनदेन बोधितः प्रातरेव कृतदेवतार्चनः ।
तत्स्वयंवरविधानमीक्षितुं तत्क्षणादहन स प्रसाधनम् ॥ २० ॥
दिव्यभूषणगणैः स भूषितः कान्तिचक्रकृततारकार्मुकैः ।
[कां]चन श्रियमवापदद्भुतां दाहतः प्रथमगन्धजो यथा ॥ २१ ॥
रूपसंपदनुरूपमण्डनाडम्बरादितमहाकुतूहलः ।
तत्स्वयंवरसमाहृताखिलक्षोणिपालमगमत्सभाङ्गणम् ॥ २२ ॥
तत्र चित्ररचनामनोहरं काञ्चनोपचितमञ्चमुच्चकैः ।
आरुरोह स नरेन्द्रदर्शितं तुङ्गभूधरमिवाशु केसरी ॥ २३ ॥
विस्फुरत्यथ स दक्षिणेक्षणे पाणिपीडनविधानशंसिनि ।
पूर्वभूधरतटीमिवार्यमा हैमविष्टरमलंचकार च ॥ २४ ॥
भूभृतः सदसि तस्य भूषणोद्भासिरत्नमुकुरेषु बिम्बितः ।
रूपसंपदपहस्तिता क्षणादाश्रितास्तमिव सेवनेच्छया ॥ २५ ॥
यै. पुरा स्फुरदुरुप्रभाभरादात्मभिः सदसि भास्करायितम् ।
श्रीजयन्तयुवराज्यसंनिधौ ते दधुर्दिनविधूपमेयताम् ॥ २६ ॥
तत्र पौरनिकरेषु कौतुकोत्तानलोचनपुटेष्वनुक्षणम् ।
मागधेषु निजबुद्धिवर्धितोदामकाव्यरचनाभिधायिषु ॥ २७ ॥

१. 'निन' इति स्यात्.

उत्तमत्वगुरुगौरवे जनमागतं गिरिशि महीपतिं ।
मूर्धनि प्रतिनादं च दुन्दुभिध्वानमांगलिकशङ्खनिस्वने ॥ २८ ॥
गीतमङ्गलकुतूहलोन्मुखे भूमिनेतृनिकुरम्बके ।
स्थापितासननिवेशशंसितश्रीनितु सितिरपूरितासितु ॥ २९ ॥
सान्द्रचन्द्रकरमोदगम्बरा चारुचन्दनगन्धसंगता ।
मूर्तिमत्युदितपद्मवारिजा फाल्गुनीव कुसुमकालिनी ॥ ३० ॥
अङ्गसंगनिविचित्रभूषणोद्गीर्णकान्तिकलनककार्मुका ।
उत्तमद्रुपयोधरोद्धुरा मेघकालकमलेव जङ्गमा ॥ ३१ ॥
श्रोणिबिम्बकुचकुम्भगौरवान्मासु गच्छतु रमा रमातलम् ।
दानमेदुरमनङ्गमालगं मन्थरां गतिमितीव तन्वनी ॥ ३२ ॥
चक्रभृत्करधृतस्वयंवरोद्दामदामनि निविष्टलोचनाम् ।
गन्धलुब्धमधुपाङ्गनाप ··· ध्वानमन्मथमरान्दिवानिशाम् ॥ ३३ ॥
कामिनीजननिसर्गसज्जया लज्जया विनतचक्रवारिजा ।
वाञ्छिताभिनवभर्तृदायिनः कुर्वतीव नतिमङ्गजन्मनः ॥ ३४ ॥
आविरास रसनागुणकणत्किङ्किणीनिकरबोधितस्मरा ।
वैरिसिंहनरनाथनन्दिनी नन्दिनी निखिलभूपचक्षुषाम् ॥ ३५ ॥
(कुलकम्)

भासयत्युरु सभा नभोऽङ्गणं तां जयन्तयुवराजभास्करे ।
चेतसापि विजहुः क्षितीश्वरा वासरश्रियमिवाशुतारका¹ ॥ ३६ ॥
व्यालिलेख मुहुरङ्घ्रिणा महीं सा चकर्ष भृशमंशुकाञ्चलम् ।
श्रीजयन्तयुवराजदर्शने कारिता किमु न पुष्पधन्वनः ॥ ३७ ॥
एतदीयवदनेन्दुदर्शनादुत्तरङ्गगुरुरागसागरा ।
चेष्टितानि विदधुर्वसुंधराधीश्वराः सदसि ते स्मरोद्धतम् ॥ ३८ ॥
प्राससेरसमखिलेषु भूभुजां भूषणेषु निजहारमुज्ज्वलम् ।
उन्नतेन हृदयेन सर्वतः कोऽप्यदर्शयदखर्वगर्वतः ॥ ३९ ॥

---

१. 'ग' इति स्यात्.

हन्ति पञ्चभिरपीषुभिः मारो मां तदेनमभिहन्मि हेलया ।
कोऽप्यभाषत नृपः कृपाणिकावल्गुवल्गनमिनीव सूचयन् ॥ ४० ॥
नागवल्लिदलवीटिकामिषादङ्गुलीरिव मुखे विनिक्षिपन् ।
कोऽप्यलक्ष्यत पतिवरेच्छया मन्मथस्य पुरतः क्षितीश्वरः ॥ ४१ ॥
अङ्गुलीयमणिदर्पणे महस्येणनाभितिलकं न्यभालयत् ।
कोऽपि भूपदुहितुः समीहयेवाक्षरावलिमलीकसंगताम् ॥ ४२ ॥
पाटवं वचसि नाटयन्मुधा मीनलाञ्छनगुरोर्निदेशतः ।
नव्यकाव्यरचनासु चातुरीं कोऽप्यदर्शयदुदारदर्शनः ॥ ४३ ॥
लीलमाद्रिपतमीक्षणाम्बुजं कोऽप्यधत्त वसुधापुरंदरः ।
पातुमेकसमयं नृपाङ्गजारूपसंपदमृतच्छटा इव ॥ ४४ ॥
कीर्तनं विशतु मा स कन्यका काङ्क्षिणामपरभूभुजामिव ।
अङ्गुलीकिसलयेन कश्चन श्रोत्रसंपुटमिति व्यघट्टयत् ॥ ४५ ॥
व्यालिलेख सदसि क्रमाङ्गुलीपल्लवेन तपनीयविष्टरम् ।
तत्र सुसमधिकं परिश्रमाद्बोधयन्निव झषध्वजं पुरः ॥ ४६ ॥
'वन्दिवृन्दनिनदं स संमदो संनिरुध्य मधुरोद्गमध्वनिः ।
भूपतीन्विदितवंशविक्रमान्येश्रभूतमवशादकीर्तयत् ॥ ४७ ॥
शंभुशैलमभिमानलीलया वामपाणिकमले निधाय यः ।
आमकाङ्क्ष किल दक्षिणे करे कर्तुमुग्रम····रावण वशी ॥ ४८ ॥
पुष्पलावमवलूय मल्लकानवैयत्यममधिकमे क्रमात् ।
यत्र सद्गुणवर विलोकयत्नाकुल सममवविलोचन ॥ ४९ ॥
सं सुरासुरसमाजरावण रावण रणपुरीजविक्रमम् ।
प्रेमभङ्गुरनिधि विमन्वना येन शान्तिवमतत्वत क्षिते ॥ ५० ॥
सम केथिरपुनाविन्नाशिनो वन इयनवनामनर्तारनः ।
सन्वंस शशिवुरिर एष पु परव गुरुनुस्वरं न्वम् ॥ ५१ ॥
एनरइनयनीयशाविनी लेखनीरनान्यावनोइने ।
शावरन्दयपुरी निरस्त स इन्मंथ गुरुहंवने ॥ ५२ ॥

तं निरूप्य नृपतिः पतिंवरा किंचिदंचितपुटेन चक्षुषा ।
अथ राजविमुखादिति······ज्जुगमनं फणिपतिरस्तवान् ॥ ११ ॥
लोहितैतमममागरं पुरः स्मेरकैरवसमानलोचनम् ।
वैरभूम्मृगदृशो वशीकृताम्भोजराजकमदर्शयद्धनम् ॥ १४ ॥
[illegible]नोपनापितैः कौशिकैरिव जवाद्रतिभिः ।
मानमात्मनि [illegible] मृगनाभिकर्दमात् परिकल्पिता स्थितिः ॥ १५ ॥
नैष चन्द्रमुखि वेरनायकः सायकाम्बुजमिनारिपारकः ।
अस्ति नेत्र यदि नेत्रकौतुकं तर्ष्णात्र रिपयाभिसर्पसि ॥ १६ ॥
कवचनापि गुणिकभाजने नव सा समभवत्तराङ्मुखी ।
दैवमृत्वनुरजिन कानिचायते हि विभिवान कौतुकम् ॥ १७ ॥
तमुपा नादि वेत्र सखिमा नामधान्यनृपनेनिनाय सा ।
[illegible] पङ्कजारपारहृत ध्रामान् ॥ १८ ॥
[illegible] मदयाति दुर्गतः ।
[illegible] ॥ १९ ॥
[illegible]र्णदृशम् ।
[illegible]मनाथः ॥ २० ॥

भारती वसति यत्र……………………वारिधेः सुता ।
अस्य चाङ्कमधिगम्य निर्मलं त्वं तयोर्भव शुभे तृतीयका ॥ ६६ ॥
सामनादरवतीमिहाधिकं सावितर्थ्यं सुकुमारया गिरा ।
अन्यमुन्नतभुजं महीभुजं ख्यातकीर्ति…………द्रुतम् ॥ ६७ ॥
शिश्रिये निशितशस्त्रघट्टनप्रोच्छलच्छिखिशिखामिषेण यः ।
संभ्रमाद्युधि जयश्रिया हरे व्यत्ययादिव वसानयांशुकम् ॥ ६८ ॥
भस्मसात्कृतमवेत्य मन्मथं मन्मथारिनयनोत्थतेजसा ।
भूप एष तमिवाधिकद्युति यं व्यधत्त विधिरङ्गनावधिम् ॥ ६९ ॥
सोऽयमब्जनयने ककुद्धये गुञ्जतामहिपने करोति यः ।
कन्यकुब्जनृपतिश्चभूर्भवेन्नेत्रपङ्करुहगोचरोऽस्तु ते ॥ ७० ॥
क्षेमुमस्य शिरसीव तत्क्षणं पादपद्ममुदपातयन्……… ।
गन्तुमन्तिकमसौ समुत्सुका श्रीजयन्तनृपतः समीहितम् ॥ ७१ ॥
यानपास्य नृपतीन्पतिंवरा सा जगाम गुरुकामविह्वलान् ।
ते तयाऽऽजनयनैर्विलोचनैः श्यामतां दधुरिवाक्षमेक्षिताः ॥ ७२ ॥
सा विहाय नृपतीनथाजनि श्रीजयन्तमभि भूपतेः सुता ।
नाकिनोऽनुपमरूपसंपदः श्रीमुकुन्दमिव मन्थनेऽम्बुधेः ॥ ७३ ॥
तत्र चित्रितजगत्त्रयाधिकं सानुरागमनसं विराध्य ताम् ।
वेत्रभृद्वदनु तापमुच्चकैरभ्यधत्त मधुराक्षरामिति ॥ ७४ ॥
यत्करेऽरिकरिकुम्भभेदनोन्मुक्तमौक्तिकभरेण दन्तुरः ।
भात्यसिः समिति वीक्ष्य नश्यतः सत्वरानुपहसन्निव द्विषः ॥
विष्टपत्रयजयैकधुर्यया निर्जितः स्वभुजवीर्यचर्यया ।
कुण्डलाख्यविबुधो मदोद्धतोऽप्याशु दास्यमभजद्यदग्रतः ॥ ७
जैनजैत्रभुजशालिना प्रजा पालिताऽभ्यधिकमृद्धवृद्धिभिः ।
निन्दति स्म मरुतामपि श्रियं सोऽस्ति विक्रम इति क्षितीश्वरः ॥
तस्य सखि स एव बोधितघ्नोऽपि पद्मनिकरं स्वतेजसा ।
उद्धसितकुलैकभास्करः श्रीजयन्त इति तत्तनूद्भवः ॥ ७

उच्छलत्प्रबलपक्षशालिनाप्याधिमुख्यमुपगम्य चापलात्।
यत्प्रतापदहनेऽतिदुःसहे सिंहलेन शलभायितं युधि ॥ ७९ ॥
सिंहलीवदनचन्द्रचन्द्रिकां सिंहिकासुत इवासि भीषनः।
यस्य बाहुरसहिष्ट विष्टपानिष्टलुण्ठनपटुर्न संगरे ॥ ८० ॥
खेचरेगमतिदुःसहैः शरैः कुर्वताषि नृपतेः कुटुम्बिनम्।
चक्रवर्तिपदसंपदात्ममाधेन राजतगिरो व्यधीयत ॥ ८१ ॥
यश्चकार शरघोरणिक्षतान्खेचरान्समिति भूमिगोचरान्।
तद्वधूनयनबाष्पबिन्दुभिः सार्धमुद्र····ति पुरः पुरः स्मरान्(?)॥८२॥
आदिकोलकुलशैलकच्छपाम्भोधिभोगिपतिदिग्गजाः।
सन्ति संप्रति चिरात्सुखोन्मुखा भारमुद्धरति यद्भुजे भुवः ॥८३॥
चन्द्रमाः शशमलीनसच्छविस्तापकृच्चरणिरुग्रतेजसा।
तत्र किंचिदसन्नद्विधिश्चिरादस्य येन मुखमेति तुल्यताम् ॥ ८४ ॥
कस्य तस्य सखि भूपसंपदं स्तोतुमेति रसना समर्थताम्।
यस्य विश्वजनतातिशायिनो मन्मथेन तुलनापि लाञ्छनम् ॥८५॥
कौशलेन कलया कुलेन च त्व तमेनमनुरूपमात्मनः।
एहि मुग्धहृदये वृणु द्रुतं गेहिणीव हरिणाङ्कमुत्सुका ॥ ८६ ॥

आकर्ण्य कर्णमधुगामिति वाचमुच्चै-
किंचित्त्रपामगमपास्य नरेन्द्रपुत्री।
माला स्वयंवरमहोत्सवभासिणी ता
श्रीमज्जयन्तनृपते क्षिपति स्म कण्ठे ॥ ८७ ॥
असमदेशनिहितामथ माला ता द[illegible]विरराज।
शेषभूमिपतिकीर्तिपत्ताकामाद्यिन[illegible]सं[illegible]भवमत्रीं ॥ ८८ ॥
उद्दच्छद्दुमम[illegible]द्दुर्ग[illegible]भुज-
स्त्राशङ्कच जयन्त[illegible]चरपति दुर्जय[illegible]ाक्रमे।
मन्द मन्दमपर[illegible] प्राभृत-
[illegible]यादाय[illegible] वैरिविहद्विहिताभ्याम[illegible]गमा ॥ ८९ ॥

समं तया भूमिपनेस्तनूजया जयन्तभू(?)नत्मपरिच्छदः सदः ।
कुतूहलोत्तालपुरंध्रिमङ्गलैर्महोत्सवं मोगल्यस्तथाचलन् ॥ ९० ॥

अथ श्रिया हरिरमाजि विराजतेऽथ
पाथोपतिः सुरतरङ्गवनीसनाथम् ।
देवी शिवा प्रणयिनं हरमथ लेभे
पुष्पायुधं रतिरवाप किलाधुनैव ॥ ९१ ॥

सफलतामधुनैव हि वेधसः श्रममरोऽपि जगाम विहारयन्(?) ।
यदनुरूपवरेण समागमः समजनि सितपङ्कजचक्षुषः ॥ ९२ ॥

पौराणामित्यमभ्यर्णे कर्णे कुर्वन्गिरः पथि ।
मन्दिरं मङ्गलोल्लासि सोऽथ प्राप महीपतेः ॥ ९३ ॥
(त्रिभिर्विशेषकम्)

हर्षोत्कर्षाद्भुतमुभयतः संगताभिर्वधूभिः
स्पर्धाबन्धादधिकरचिते कृत्यजाते क्रमेऽथ ।
हृमे सौम्यमहबलयुजि स्वानुभावानुरूपं
तस्मिन्सुर्वीपतिदुहितरं पर्यणैषीज्जयन्तः ॥ ९४ ॥

प्रमोदनटनपुरस्पुरंध्रिहारावली-
गलत्तरलमौक्तिकैः पथि चतुष्कमापूरयन् ।
ततोऽभिनववल्लभामवनिवल्लभः सादरं
हरि श्रियमिवानयत्स्वनिकेतनमुत्तोरणम् ॥ ९५ ॥

अनुभवन्तनया सह भूपतिस्तदनु वैषयिकीं श्रियमन्वहम् ।
कतिपयान्दिवसान्पितृदर्शनोत्सुकमना अपि तत्र निनाय स ॥९६॥

इति श्रीनारायणसूनुभट्टाभयदेवकृते [illegible] महाकाव्ये
[illegible] नाम [illegible] सर्गः ।

[illegible] सर्गः ।

अथ श्रिया निर्जितदेवसद्मनो श्रीमज्जयन्तो [illegible] ।
[illegible] दिवसा नरेन्द्र हृष्टेन सार्धं [illegible] ॥

सर्ग·········त··।
··॥ २ ॥
·········केन प्रमदाकुलानां कर्णामृतैर्वाग्मिगिरां विलासैः।
श्रीवीरसिंहेन विधीयमानयथोचितार्चस्य दिनानि यान्ति ॥ ३ ॥
परेद्यवि श्रीरतिसुन्दरीदं प्राणप्रियं विज्ञपयांबभूव।
उल्लासयन्ती दशनांशुजालैः सा मीनकेतोरिव वैजयन्ती ॥ ४ ॥
कस्माद्विमुच्यान्यनरेन्द्रवृन्दं त्वां तूर्णमेवावृणवं सहेलम्।
आद्यावलोकेऽपि च तेऽवनीश दिवामणेरम्बुजिनीव जाता ॥ ५ ॥
विद्याधराणामधिपः स विद्यादेव्या मुखेनोत्तरयांबभूव।
प्रियप्रियालापसुधावसेका········दिवाङ्कुरत्पुलककाङ्कुरश्रीः ॥ ६ ॥
उवाच सा पूर्वभवे भवस्य स्निग्धा भवानीव सधर्मिणीयम्।
बभूव तेऽत्रापि ततोऽनुरागात्त्वम्यस्तमभ्येति भवान्तरेऽपि ॥ ७ ॥
तथाहि यस्यां कुचकुम्भचक्षुर्नीलोत्पलास्येन्दुनितम्बबिम्बैः।
स्त्रैणं चकाशे चतुरङ्गसैन्यैरिवोल्वणैः पञ्चशरस्य राज्ञः ॥ ८ ॥
श्रीस्वस्तिमत्यां पुरि तत्र भूभृद्बभूव वज्रायुधनामधेयः।
हेलाहतानम्रनरेन्द्रकान्तानेत्राम्बुसंवर्धितवारिराशिः ॥ ९ ॥
आसीच्च तत्रैव समुद्रदत्तः कलानदीष्णोऽपि सदा दरिद्रः।
स्वपूर्वकर्मस्फुरितानुसारं शुभाशुभं देहभृता फलं हि ॥ १० ॥
स कुन्तली कुन्तलभामि पक्षे दिने दिने चन्द्रिकया च चन्द्रः।
संपूर्णभिक्षाविरहे नदोधे क्षीण सपत्न्या सह कान्तिमत्या ॥ ११ ॥
एकातपत्रेऽपि सुभिक्षराज्ये वदान्यताभाज्यपि तत्र लोके।
सुदुर्लभा तस्य बभूव भिक्षा क्व मन्दभाग्यस्य समीहितं वा ॥ १२ ॥
गृहे गृहे तत्र सम सपत्न्या बभ्राम भिक्षामपि मुक्तमानः।
दुष्पूरसीमोदरपूरणाय प्राज्ञोऽपि दुष्कर्म करोति किं न ॥ १३ ॥
निरन्तरामन्दुरन्तदुःखदारिद्र्यमुद्राज्वरजर्जिताङ्गौ।
तौ दम्पती जीवितनिर्व्यपेक्षौ शैलं समारोढुमथ प्रवृत्तौ ॥ १४ ॥

१. 'दं' इति भवेत्. २ सर्वासु कलासु चतुरोऽपि दरिद्र

समालतालीवनराजिनीलः कालाग्निधूमः किल कौतुकीव ।
यद्व्याजतः पूरितरोदसीको निर्गत्य भूभागमलंचकार ॥ १५ ॥
तद्वत्तरङ्गैः सरितां प्रवाहैर्मही यदीया सततं चकास्ति ।
वामभ्रुवामुच्चकुचाग्रपीठीव स्फुरत्प्रभैर्मौक्तिकहारिहारैः ॥ १६ ॥
तस्मिंस्तपस्यन्नथ साधुरेकः न्यस्तार्कदृष्टिर्विहितोर्ध्वबाहुः ।
हस्तावलम्बाय शिवोन्मुखानां भवाम्बुधौ पातभियेव ताभ्याम् ॥ १७ ॥
महात्मनो दुष्करकारिणोऽस्य पादप्रणामः खलु शम्बलं नौ ।
प्रेत्य प्रयाणेऽस्त्विति दध्यतुस्तौ हृष्यं हृदम्भोरुहि भावि भद्रम् ॥ १८ ॥
श्रीमन्मुनिं तन्मिथुनं ववन्दे हर्षप्रकर्षोद्धुषिताङ्गयष्टिः ।
सधर्मलाभेन ततः कृताशीरादध्दा तत्र कृतोपयोगः ॥ १९ ॥
मुक्ताफलं न्यस्तमिव स्वहस्ते ज्ञानेन निर्णीय तयोः स्वरूपम् ।
आलापयद्भद्र न भद्रमेतत्प्राण प्रहाणं युवयोरिहैवम् ॥ २० ॥
निन्द्य बुधैरात्मवधं विधत्ते कथं सुधीरप्यधमत्वधाम ।
न चामुत किंचिदपैति दुःस्य व्याधिः कुपथ्यादिव वर्द्धते तु ॥ २१ ॥
जलाञ्जलिं दित्ससि चेन्निजाना दुष्कर्मणा दुःखदानप्रदानाम् ।
सर्माहितार्थोपयिक नैदक मुपात्रदान कुरु भिक्षयापि ॥ २२ ॥
अङ्गीचकारैनं गुरूपदेश कल्पद्रुमस्येव फल बुभुक्षु ।
तन प्रमाण कृतपूज्यपार्श्वमनया पुरस्तान्मिथुनं प्रनम्य ॥ २३ ॥
प्रायेण चित्र[illegible]समन्ततो निर्जगा[illegible] ।
या [illegible] ॥ २४ ॥
[illegible] ।
[illegible] ॥ २[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

दुःस्थामवस्थामपि जग्मिवांसौ कृच्छ्रात्तमिश्राममिमौ कुकामी।
तौ दम्पती तत्र जलाशयान्ते स्थानं ततः शीतलमाश्रयेताम् ॥ २८ ॥
मासोपवासादितपोविशेषैस्त्वगस्थिशेषाङ्गमनङ्गरूपम्।
तस्मिन्पुरे पारणकाय यान्तं तौ दृष्टवन्तौ सुकृती मुनीन्द्रम् ॥ २९ ॥
सुदुर्लभं सर्वरसप्रशस्यं त्रिलङ्घनान्ते ददतस्तदन्नम्।
मुनेस्तदा सर्वमखर्वभावो किं दुष्करं धर्मधनस्पृहां हि ॥ ३० ॥
तद्दानतस्तौ परमप्रकर्षप्रमोदपीयूषविशेषपानैः।
अवेदनान्नौ स नृपः क्षुधोऽपि सुखं शिवस्येव तदान्वभूताम् ॥ ३१ ॥
राजन्समागत्य सुरः सुदृष्टिर्मुनीन्द्रभक्त्याथ तयोरुपान्ते।
विद्युत्प्रभामासुरकायकान्तिर्विद्युत्प्रभाख्योऽभिदधे सितास्यः ॥ ३२
अहो महादानमिदं तवाभूच्छ्रीमन्मुनेस्तीव्रतपोऽवसाने।
महाद्रुमस्येव घनाघनाम्भः संभारवृष्टिः शुचितापशेषे ॥ ३३ ॥
यद्दुष्करं दुष्करकारिणेऽस्मै विश्राणनं त्वत्करपङ्कजेन।
सुपात्रदानानुगुणेन तेन त्वयि प्रसन्नोऽस्मि समुद्रदत्त ॥ ३४ ॥
विधेहि वाग्गोचरमंचरिष्णु. स्ववाञ्छितं तद्विदधामि येन।
एवं हि मे नृत्यतु दानधर्मानुमोदनाल्लक्षणपुण्यलक्ष्मीः ॥ ३५ ॥
कृताञ्जलिर्वीक्ष्य ममभ्रमम्न व्यजिज्ञपन्मोऽपि विनम्रमौलिः।
सुदुर्लभं श्रीजिनशासनं यल्लेभे मया तत्किमितोऽर्थनीयम् ॥ ३६ ॥
तथापि मा धार्मिकवत्सलानां प्रभावमाभाग्यनरञ्जितानाम्।
प्रसादवाक्यं भवता सुरेश मन्मस्तके यातु किरीटसख्यम् ॥ ३७ ॥
जिनेन्द्रधर्मस्य समुन्नतानां सार्वत्रिकीणां परभागभाजाम्।
संदेहलोकेऽपि भवत्प्रसादान्निबन्धनं स्यामिति मेऽभिलापः ॥ ३८ ॥
ततः सुरो चिन्तयदस्य पुण्यं प्राज्यैस्तेति स शुभाशयोऽयम्।
जागर्ति य सिद्धिसुखोत्सुगर्यं नराभरार्धाश्वरसपदेऽपि ॥ ३९ ॥
संपत्स्यते ते स्वयमेव पुण्यैस्त्रिविष्टपाधीशप्रकोम्लादिष्टम्।
साहाय्यमात्र त्विदे मत्प्रभावस्य प्रत्यवादीत्रिदश प्रहृष्टः ॥ ४० ॥

विमलन्दर्भां सुरपमलक्ष्मीं सौधे समस्ताद्भुतवस्तुभाजि ।
रूपश्रिया प्रीणितनेत्रया च चक्रे स तौ स्वर्मिथुनायमानौ ॥ ४१ ॥
ततो विमाने किरणैर्मणीनां दिवामणेर्विभ्रममादधाने ।
निवेश्य दिव्यर्द्धिविशेषरम्ये स श्रीपुरोद्यानमवापयत्तौ ॥ ४२ ॥
तदास्य भूभर्तरि कालधर्मः क्रोडीकृते दैववशादपुत्रे ।
समाकुले राजकुले समन्तादसंगतं भानुमतीव चक्रे ॥ ४३ ॥
लुण्टाकलोकेन विलुण्ठ्यमाने गृहे गृहे पौरजनस्य वित्ते ।
नीराजराज्यग्रहणाग्रहेण ढौकयमानेऽपरराजलोके ॥ ४४ ॥
निपीयमाने च धने धरायां सर्वत्र विस्फूर्जति वैशसे च ।
राजानमैच्छज्जनता तदानीमुपप्लवानामुपशान्तिहेतुम् ॥ ४५ ॥ (विशेषकम्)
उपद्रवं सर्वमपास्य देवः पयोधरस्येव पयो दवाग्निम् ।
प्रदर्शयामास ततः कुमारं राज्योचितं राजसभागतो नः ॥ ४६ ॥
अनेन नाथेन सनाथतां नः श्रीमत्कुमारेण विभो विधेहि ।
सुरेश्वरेणेव दिविः सुराणां सेर्व्यंगवीदं स मतिस्थिरोभिः ॥ ४७ ॥
सुराभिषिक्तोऽथ स तेन तत्र रराज राजा शरदीव सूरः ।
यस्य प्रतापः प्रतिपक्षिकान्ताकपोलपत्राङ्कुरशोषकोऽभूत् ॥ ४८ ॥
सुपर्वणा पर्वणि तत्र दत्तश्रीराजसिंहापरनामधेयः ।
सामन्तयुक्त्यैरपि स प्रणेमे पृथुप्रभावो जयराजदेवः ॥ ४९ ॥
तूर्यत्रयं तत्र [illegible] ।
राज्योत्सवेऽभूत्तदशेषविश्व [illegible] ॥ ५० ॥
एकातपत्रं विश्वे [illegible] ।
[illegible] ॥ ५१ ॥
तदद्भुतं [illegible] ।
[illegible] ॥ ५२ ॥
[illegible] ।
[illegible] ॥ ५३ ॥

इति प्रमोदामृतवीचिमज्जन्मनाः सुरेन्द्रप्रतिमः स देवः।
विशुद्धमभः क्ष्मापसूनमुवाच वाचस्पतेरपि प्रीतिकरैर्वचोभिः(?) ॥१४॥
धर्म्यैर्गुणैस्ते हृदयं मदीयं वशीकृतं गौरयशोवतंसैः।
नरेन्द्र शार्दूलसमूलचूलसंसारवृक्षक्षयबद्धकक्षैः॥ ९५॥
सद्भावभाजा विनयेन सत्त्वया संदानितात्मेव न गन्तुमीशः।
तत्राद्य यद्यप्यमरेन्द्रपुर्यां तथापि मामुत्कलयोचितज्ञः॥ ९६॥
सम्यग्दृशां देव शिरोमणिस्त्वं स्वयं सुरेन्द्रेण निबद्धसख्यः।
अन्यमहीर्भामपि तादृशं यल्लोकोत्तरं ते चरितं यदीदृ॥ ९७॥
स्तुत्वेति तं भक्तिभरावनम्रः संपूज्य पूज्यं विहितोपकारम्।
स प्रार्थयामास दृशोः सदास्तु त्वद्दर्शनानन्दमयोत्सवो मे॥ ९८॥

तदनु तदनु रागेणान्तरङ्गीकृतात्मा
शुचि यशसि चरित्रे राजसिंहस्य देव।
सुरपरिवृढबन्धुर्विस्मयस्मेरनेत्रं
जगदपि विदधानः स्वश्रिया स्वर्जगाम॥ ९९॥

अथ सकलधराया मण्डनात्स स्वराज्यं
........सुकृतज्ञः कार्मण सिद्धिवध्वाः।
त्रिभुवनमपि कीर्तेर्लास्यलीलैकरङ्गं
गुणिषु निपुणदान श्रीनिदान चकार॥ ६०॥

राज्ये निवेश्य तनयं समये जितारिं
राजा तया मृगदृशा सह कान्तिमत्या।
कोटिं....समधिरुह्य च भावनाया
दिव्यं विमानमिव स त्रिदिवं जगाम॥ ६१॥

वृन्दैरप्सरसां विलम्ब्य विनमत्स्वःसद्मचूडामणि-
श्रेणीषु प्रतिबिम्बचुम्बिचरणो भुक्त्वेन्द्रराज्यं चिरम्।
क्षोणीमण्डलपालनाय कम्पोद्रिकादिवावातर
स त्वं विक्रमसिंहभूपतिकुले श्रीमज्जयन्तो नृपः॥ ६२॥

प्रथितलटभरूपान्तःपुरीचक्रवाले
  मुलित''''तिकलक्ष्म्याः कान्तिमत्याश्च जीवः ।
अजनि स मुनिदानादिन्द्रसामानिकश्री-
  स्तदनु नृपतिपुत्री प्रेयसी ते च भूप ॥ १३ ॥
विद्यादेवीनिजगतिभुवा तत्र जातिस्मरेण
  व्यक्ते हस्तामलकतुलया पूर्वजन्मस्वरूपे ।
शुद्धे पक्षे शशिसमुदयेनाम्बुराशेरिवाम्भः-
  स्तस्य प्रेमानवधि मिथुनस्याथ विस्तारमाप ॥ १४ ॥
इतः प्रत्यक्षं ते चरितमुदितश्रीपरिकरं
  परं किं किं भूयोऽपरनृपयशःकैरवरवे ।
इदं विद्यादेवी निगदितवती तेन महिता
  विसृष्टा दृष्टा सा द्रुतमथ तिरोऽभूत्तडिदिव ॥ १५ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीजयन्ताङ्के नरेन्द्रपूर्वभववर्णनो नाम सप्तदशः सर्गः ।

अष्टादशः सर्गः ।

अथ निरन्तरया रतिसुन्दरीमुखसुधाकरचन्द्रिकयाश्रितः ।
अपि समागतमुष्णदिनं नृपः शिशिरकालमिवाकलयत्तदा ॥ १ ॥
यदभिसंगमतः खलु मित्रतोऽप्युदयते परितापभरो भुवि ।
उपद्रवादिव वीरुधिदारुण' किमु निदाघऋतुः स न दुर्जनः ॥ २ ॥
अकृत सृष्टिममुष्य सरस्वती सुचिरशोषकृतोऽपि कृतोऽविधिः ।
भुवि पुराणपुमानिति मन्दधीरति कलङ्कपदं स ततोऽजनि ॥ ३ ॥
दिनकर. करदण्डनिपातनैस्त्रिजगता परित परितापद. ।
तदपि पङ्कजिनीप्रमृतायने मियतमासु न यो हि मृदुर्यत' ॥ ४ ॥
पथिषु पान्थजनस्य चरेणवस्तपनतापवन ' 'नर्मदया ।(!)
स्फुरितवह्निकणैरिव वर्षिण. सततगाभ्रनिनाजनमरुद्रुदा. ॥ ५ ॥
महुनृपेव रमारसपतनमारजिरेष महामरदुर्वह ।
अभवदस्य रथाधगतिः शनैर्भ्रमणो दिनराज्ञिरयायन ॥ ६ ॥

सरसचन्दनपङ्कविलेपनैः सुघनसारपरागतरङ्गितैः।
शिशिरतादिगुणैः खिभि(?)रञ्चितैः सततगैः सुरतक्रमहारिभिः॥ ७॥
घननिभैः कदलीदलमण्डपैः सरविबोधनबन्धुरपण्डितैः।
विमलमौक्तिकभूषणभूषया तुहिनरश्मिरुचाच जलार्द्रया॥ ८॥
हिमरुचे रुचिरैः करकोरकैरुपवनैर्मधुधौतधरातलैः।
सितसरोजरजःसुरभीभवन्न····पयस्सु रयस्सु वमज्जनैः॥ ९॥
अभिमतैः शिशिरैरपरैरपि स्मरनरेन्द्ररसाढ्यरसायनैः।
जगति भोगिजनेन पुरस्कृतैर्लघुनिदाघऋतुः परिभूयते॥ १०॥
(चतुर्भिः कलापकम्)
सरसकेलिमिथाङ्गनिपीडनैर्दृढमनङ्गसुखैः खलु वञ्च्यते।
यदिह भोगिजने घनधर्मतस्तदिहमुष्मऋतोः खलु वल्गितम्॥ ११॥
व्यरचि यो मृगलोचनया प्रपा सुरभिकुम्भजलेन युवा नृपः।
लवणिमामृतनिर्भरपानतोऽजनि स तत्कुचयोस्तृषितोऽद्भुतम्॥ १२॥
गिरिदवानलदग्धवनोद्भवं भ्रमति भस्मसितं वितततीकृतम्।
जगति बन्दिजनैरिव वायुभिर्यदा इवोष्ण ऋतोरवनीपतेः॥ १३॥
खररुचे रुचिभिः परितापिनैः प्रकुपितैरिव मण्डलमादधे।
अनिलतो विततैर्दिवरेणुभिः कठिनपाकपलाशदलोपमम्॥ १४॥
न परमुग्रमयं रतिसुन्दरी प्रियतमः सहते निजशासनात्।
इति भयादिव कम्पितमानसस्त्वरितमुग्रऋतुः प्रपलायत॥ १५॥
जय जयोन्मुखमङ्गलपाठकैरिव कलापिकुलैः कलनादिभिः।
घनघनाघनघोषमिषेण च प्रमृमरैर्जयदुन्दुभिनि स्वनैः॥ १६॥
जलदमध्यचलत्त्रिदशकण्टिकावनिमिषाचमरैश्च चलाचले।
स्फुटशिलन्ध्रितनातपवारणैर्भुवि नपात्ययभूभृदवातरत्॥ १७॥
विनिनुते भुवनाद्भुतवैभव त्वमिव किंतु मुखे मलिनत्वमभूत्(?)।
अयमिति प्रियमुक्तवती मती ममभवद्भनये रतिसुन्दरी॥ १८॥
मिथुनकैर्नववारिदवायुना पुलकिते स्मृतोमिविवर्धिणा।
अथ मिथः परिरम्भमुखैर्मुदा नवमिवाक्रियते स्मरशासनम्॥ १९॥

जलदकालनृपस्य घनो भटः परिलसत्तरवारिसमुद्भटः ।
तडितमुमप्रतो स्म दिदृक्षया क्षिपति दृष्टिमिवातिरुषा नृणाम् ॥ २० ॥
मृतनमस्त्वारिदवृष्टिभिर्नयनयोर्द्रुतमर्पितकौतुकः ।
विलसतां सह वल्लभया भृशं भवति वारिमुचां समयः प्रियः ॥ २१ ॥
भुवनमभ्यमृतेन पयोधरः सुखयति महतातपवैशसः ।
विरहिणीर्दहति स्मरवह्निना पुनरहो चरितं विविधं विधेः ॥ २२ ॥
कवलितं सकलं किल तेजसं पटलमुल्बणमुष्णकतोरिव ।
पवनवल्लितदीप्तदवानलप्रशमनच्छलतो घनवारिभिः ॥ २३ ॥
जलदवारिकणैः परिचुम्बितं नवकदम्बमुदञ्चितकेसरम् ।
अनुकरोति विलासिनमुच्चकैः पुलकितं दयितापरिरम्भणैः ॥ २४ ॥
गिरिशिरःपरिपातितरङ्गिणीतरलतुङ्गतरङ्गपयःप्लवः ।
त्रिजगतामुपकारितया श्रमवश इव प्रतिभाति पयोमुचः ॥ २५ ॥
जगविलासमयेऽपि मनस्विनी स्फुरितमानविखण्डनपण्डिते ।
नवघने बहुमानपरम्परा निशमभूदुपकारिणि कामिनाम् ॥ २६ ॥
स्मितवती कुटजैः स्फुटकेतकीद्युतिभिरिद्धकटाक्षपरम्परा ।
घनविभूतिरियं जगतीतले ललति रञ्जितकामनरेश्वर ॥ २७ ॥
रुचिरता चिनुते स्म परां घनः किसलपुष्पफलैश्च वनश्रियाम् ।
मृगदृशामिव यौवनमुज्ज्वल स्मरविलासकुलैरिव विभ्रमैः ॥ २८ ॥
रविमवेत्य निदाघमिवापरं जगदरुंतुदमम्बुधर' क्रुधा ।
वसुविलासमपास्य विनिर्ममे कवलिताखिलमण्डलमुच्चकैः ॥ २९ ॥
जगदुपद्रवणेषु सहायता विदधतोमप्रतोरहिमांशुना ।
मिलति दशदिनेष्वरिणा तत.·····हन्ति गिलितस्तनयित्नुना(?) ॥ ३० ॥
रुचिरकाञ्चनचित्रमणिप्रभा वलयपल्लवभृन्मुकुटश्रियम् ।
दधदिवेन्द्रशरासनमण्डलं घनघनो नृपतेः प्रविराजते ॥ ३१ ॥
सम····वर्षणतः सफलीभवत्कपिवज्रो·······दशां दशाम् ।
परिचयादिव वारिमुचां पयः शुचिमरीचिमरीचिनिभो बभौ ॥ ३२ ॥

प्रतितसर्वजनीनसमुन्नतौ विगलितायुषि वारिदभूभुजि ।
अथ जयन्तनरेन्द्रमुपाययौ स्मरशरैर्विधुरेव शरद्वधूः ॥ ३३ ॥
कुसुमसायकनायकपत्तनप्रतिनिधिं स च सौधमधिश्रितः ।
प्रणयिनीमथ कर्णरसायनं वचनमेवमुवाच महीपतिः ॥ ३४ ॥
प्रियतमे रतिसुन्दरि निश्चितं शरदियं तव याति सदृक्षताम् ।
अपकलङ्कशशाङ्कमुखी भवेद्यदि सदा सितकैरवलोचना ॥ ३५ ॥
इह मरालकुलं कमलाकरे सरभसं रमते कलकूजितम् ।
विशदपक्षवतां गुणिसंगमः कलयतीष्टतरेषु धुरीणताम् ॥ ३६ ॥
जलदबन्धनमुक्तिमहे विधोः क्षपयितुर्जलधेरिव वीचितः ।
पतितमुज्ज्वलमौक्तिकमण्डलं स्फुरति तारकचक्रमिषादिव ॥ ३७ ॥
जगति पङ्कमकारि मम द्विषा जलभृता सरितश्च विवर्धिता ।
इति रुषेव रविलदशोषयत्प्रविदधेति तनूश्च हिताः ॥ ३८ ॥
अहनि तापमपद्य परं रविर्घनघनां च शशी निशि चन्द्रिकाम् ।
शरद इष्टतरावधिकारिणाविव निदेशवशात्कुरुतस्तथा ॥ ३९ ॥
दिनकरस्य करैः परिपाकतो जलमशेषजलाशयमगतम् ।
सरसतां शरदि प्रतिपद्यते निशि शशिद्युतिभि शशिकान्तिभिः॥४०॥
मदभरोच्छलनेन निरङ्कुशाः प्रबलदर्पभरादिह कुञ्जराः ।
ततकरोऽसमनैर्गलगर्जिभिर्विदधतीव सुरद्विपतर्जनम् ॥ ४१ ॥
कविजुषामपि कान्तरसात्मनां विदधते सरिता नटपाटनम् ।
इह वृषाः शितशृङ्गशिखायुधैः क खलु दुर्मदिनामुचितज्ञता ॥ ४२ ॥
कलमशालिवनं नवगोपिका मृगदृशः परिपान्ति शुकादित ।
कलरवैर्मरणाशरणागते कुसुमसायकसायकपातनः ॥ ४३ ॥
विलसदङ्कुरमल्पुरुषाधिना. शरदि हृद्यरमश्रुनिविश्रुना ।
अलिकुलाञ्जनदन्तुरवक्त्रया: प्रियतमा इव भान्ति भुवीश्वरः ॥ ४४ ॥
मृगदृशा कलधौतरुचे निशि प्रशमनीह जगन्मुदमायया ।
धृतवियोगधिया शृणु शम्भुना पुनरुपदर्शितपाण्डुवपुर्भुवन् ॥ ४५ ॥

जगति राजसि रक्षय मन्दहैर्धनसमृद्धिवरैश्च विभूषितः ।
इति जयन्तनृपः शुभगैर्गुणैर्द्विनदिदा शरदा समुपासत ॥ ४६ ॥
नृपसुताक्षितिपाधिपयोस्तयोरतिरनिप्रिययोर्नवयोरिव ।
सरसकान्तकुतूहलकेलयेऽजनि शारसमयः समयोः श्रिया ॥ ४७ ॥
कतिपयेषु दिनेषु गतेष्वथ स्थपितरोहितधीः परमार्हती ।
जिनमते प्रतिबोधयति स्म सा सितसरोजमुखी नृपनन्दिनी ॥ ४८ ॥
स परिपाकविवेकभराङ्कुरमतिमरोमसिलं नरपुंगवम् ।
समवलोक्य जराज्वरजर्जरं नृपतिरेवमचिन्तयदेकदा ॥ ४९ ॥
वपुरिदं प्रथमं सुखसाधनं तदपि रोगजरादिभिरस्थिरम् ।
किमिह निष्फलं प्रभवं धनं वनजवह्निशिखाभिरभङ्गुरम् ॥ ५० ॥
सरसमाकुलपङ्कजलोचना ललितलोचनचञ्चलभङ्गिनाम् ।
प्रथितमायुरुपैति च यौवनं तरणितापितपुष्पदलश्रियम् ॥ ५१ ॥
लवणिमा सुरकार्मुकसोदरः सुभगता नु गता चपला रमाम् ।
अतुलरूपबलाद्यपि देहिनां समदसिन्धुरकर्णचलाचलम् ॥ ५२ ॥
नववधूमिषसंगमसंभ्रमस्खलनतटीतलहारलतातुलम् ।
जगति राज्यमशेषधराधराधिपशिरोमणिलालितशासनम् ॥ ५३ ॥
स्फुरितकोपफणीन्द्रफणावलीतलनिवासरति भजतामिव ।
विषयसेवनमुक्तिमुपेयुषा गुरुविषादिव दुर्गमितो भयम् ॥ ५४ ॥
भवति शारदनीरदसोदरं सकलमेव भवप्रभवं सुखम् ।
परिणतौ विरसं मधुरं मुखे विषतरोरिव पक्वफलं नृणाम् ॥ ५५ ॥
त्रिभुवनेष्वपि नित्यमनित्यताकवलितं निखिलं खलु दृश्यते ।
[illegible] सुखपदं वर [illegible] ॥ ५६ ॥
[illegible] विषम[illegible]भुवन[illegible] पराङ्मुखः ।
मम [illegible] गुणोऽधुना ॥ ५७ ॥
निज[illegible] भुवन[illegible] सुन्दरम् ।
इति विचिन्त्य चिर [illegible] ॥ ५८ ॥

अभिषिषेच जयन्तनरेश्वरं नगमिराज्यमुदारमहेन सः ।
कनककुम्भमुखोच्छलिताम्बुभिः पुरजनोऽप्यनुरागमुपारसैः ॥ ९९ ॥
स जिनसद्मपदाम्बुजपूजनं प्रमुदितार्थि च दानमनेकधा ।
क्षितिभृतां मतराज्यपरिग्रहे यदुचितं तदशेषमचीकरत् ॥ १० ॥
सह जयन्तनृपेण स हास्तिनापुरपतिर्गुरुमेत्य निनत्य च ।
शिरसि मौलिमिवाञ्जलिना परं विरचयन्नतिधर्ममयानत ॥ ११ ॥
सानन्दं गुरुणा ततः करनसज्योतिःप्रवाहाम्बुना
राज्ञस्तस्य विनिर्मिते व्रतमहाराज्याभिषेकक्रमे ।
तत्रासौ मुमुदे शुचौ च सुचिरं श्रीमज्जयन्तः पुन-
स्तत्त्वज्ञोऽपि विमुक्ततीष्टविरहे धिङ्मोहलीलायितम् ॥ १२ ॥
चक्रेऽथ बन्धुरवचः किरणैस्तदीयं
स्वान्ताम्बुजं विगतशो.... विकोचमुद्रम् ।
सूरिर्दिवाकर इति प्रथितो गुणेन
नाम्ना च चित्रमभृतं क्षरतीक्षणेषु ॥ १३ ॥
सेरासः श्रीविलासः सुचिरमथ गुरोः पादपङ्केरुहाणां
प्रीत्योपास्तिं विधाय प्रणतिमपि मुनेस्तस्य भूवल्लभस्य ।
पीयूषस्येव वृष्टिं निजसुकृतयशःशाखिनस्तन्मिषेण
क्षोणीनाथ प्रकाण्डः क्षितिपगृहमगात्स श्रियां डम्बरेण ॥ १४ ॥
चूडारत्नायमान. समजनि महता यः क्षमापालकाना
विश्वश्लाघ्याधरेष(ख)श्वरणगुणगणैर्धर्मलीलाबलेन ।
जित्वा मोहं ससैन्यं त्रिभुवनजयिन केवलज्ञानलक्ष्मीं
लब्ध्वा श्रीमन्मुनीन्द्रो रमयति हृदये वैरिसिंहाभिधानः ॥ १५ ॥
सार्धं करैः शूर इवाथ सूरिः स केवली केवलिमुख्यशिक्षैः ।
कदाचिदन्यत्र पुरे प्रतस्थे भव्यारविन्दप्रतिबोधनाय ॥ १६ ॥
तदनु तमनुगम्य श्रीमुनीन्द्र नरेन्द्रो
मुदकलयदस्पन्द(?) साश्रुनेत्रोऽभिवन्द्य ।

तमपि गुरुरथाशीर्वाददानेन कामं
व्यदधदमृतपूरेणेव निर्वापतापम् ॥ १७ ॥
निर्व्याजसरकेलिनिर्भररसे प्रोज्जृम्भमाणेऽनिशं
सोत्कम्पा रतिसुन्दरी प्रणयिनी जज्ञे स्फुरत्साध्वसा।
उन्मीलद्घनकण्टका च परितः क्षोणी तु भो आतुचि-
पत्सिन्धुशासति राज्यमूर्जितनये श्रीमज्जयन्ते नृपे ॥ १८ ॥
इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीलक्ष्म्याङ्के ऋतुत्रयवर्णनो नामाष्टादशः सर्गः।

एकोनविंशः सर्गः।

अथान्यदाध्यास्त सभां स भूपः सुधर्मयापि स्पृहणीयशोभाम्।
अत्यन्तविस्तारितवैरिसिंहक्ष्माधिराजः स्वगुणैः प्रजानाम् ॥ १ ॥
अमात्यमात्मीयपितुर्नृपस्य द्वितीयमात्मानमिवेयिवांसम्।
निवेदितं वेत्रधरेण वीक्ष्य चक्रे स विद्याधरचक्रवर्ती ॥ २ ॥
कृतप्रणामं सविधासनस्थं संमान्य मान्यं समपृच्छदेनम्।
नरेन्द्रनम्या मम तातपादाः कल्याणिनः संप्रति मन्त्रिराजः ॥ ३ ॥
स क्षेम लक्ष्म्या ललितैर्विलासैर्निरन्तरं दुर्ललितः क्षमेन्द्रः।
त्वां द्रष्टुमुच्चैरुदकण्ठतेति व्यजिज्ञपन्मन्त्रिपतिर्जयन्तम् ॥ ४ ॥
ततः प्रतापेन विवर्ध्यमाने साम्राज्यसौस्थ्ये सकलेऽपि तत्र।
राजा स राज्यस्थितयान्वयुङ्क्त स्वमन्त्रिणं तातविलोकनोत्कः ॥ ५ ॥
दिव्यैर्विमानैः खचरेश्वराणां मणिप्रभाकृष्टसुरेन्द्रचापैः।
सैन्यैर्वरेण्यैश्च धराधराणां स रोदसी संकटयंश्चचाल ॥ ६ ॥
श्रीमज्जयन्तः स्वपुरीं जयन्तीमालोक्य लोकोत्तरकान्तलक्ष्मीम्।
आवासयामास विशामधीशे समन्तदुद्यानभुवं विद्रूप्य ॥ ७ ॥
कुमारसैन्यादथ मन्त्रिराजे स प्रेषितात्मीयनरान्निशम्य।
समागतं नन्दजयन्तनामा···········नमितो जयन्त्याः ॥ ८ ॥
ततः स वैरिक्षितिपालमौलिमालास्नु स्वेलाद्गुरुशासनधीः।
अङ्गीकरत्तां नगरीं प्रवेशमहोत्सवाशेषविशेषभूषाम् ॥ ९ ॥

सामात(?)राजन्यकमन्त्रिराजमुख्यैरशेषैरपि राजलोकैः ।
पुरः प्रधानैश्च समेत्य तत्र स स्वामिसुनुर्मुदितैरनामि ॥ १० ॥
राज्ञो निदेशात्समुपेत्य तत्र प्रणम्य मन्त्री विबुधः कुमारम् ।
उत्कण्ठितस्ते मुखदर्शनाय पितेत्युदीर्याचलयन्नगर्याम् ॥ ११ ॥
मौहूर्तिकेनाथ शुभे मुहूर्ते निवेदिते स क्षितिपालसूनुः ।
तत्र प्रवेष्टुं प्रगुणीबभूव विधाय सर्वं समयानुरूपम् ॥ १२ ॥
अन्तःपुरालंकृतयाप्यमाने विद्याधराधीश विमानवृन्दैः ।
पदातिहस्त्यश्वरथप्रतानैः सकौतुकं स्वःपतिनापि दृश्यैः ॥ १३ ॥
सुधांशुबिम्बेन भियेव राहोः श्रितेन शुभ्रातपवारणेन ।
लक्ष्मीजयश्रीप्रहितैः कटाक्षैरिवोच्छलद्भिश्चमरैर्विलक्षैः ॥ १४ ॥
माङ्गल्यमन्त्रैरिव शङ्खनादैः समुल्लसद्भिः सह पञ्चशब्दैः ।
बन्दीन्द्रकोलाहलमांसलैश्च जयारवैर्हर्षयशोधिबन्दे ॥ १५ ॥
करीन्द्रघण्टारवडम्बरेण निश्वासनादेन भृताम्बरेण ।
साम्राज्यलक्ष्म्या च विराजमानस्ततश्चचाल क्षितिलोकपालः ॥ १६ ॥
(चतुर्भिः कलापकम्)
अत्रान्तरे राजसुतप्रवेशमहोत्सवालोकसमुत्सुकानाम् ।
उपेयुषीणां पुरसुन्दरीणां विलासलीलायितमेवमासीत् ॥ १७ ॥
कुमारलावण्यरसं निपीय काचित्सतृष्णान्तरुदीर्णकम्पा ।
कन्दर्पवैद्यं स्वपुरस्समास्य सौरभ्यलोलालिरवैर्विराहुत् ॥ १८ ॥
कन्दर्पशिल्पोपनिषत्स्वरूपैर्लीलाविलासैः स्फुटमाक्षिपन्ति ।
उपेक्षिता काचन तेन तन्वी मुमोच सौभाग्यमदातिरेकम् ॥ १९ ॥
ययौ न या गोचरमीक्षणानां मनोरथैरप्यकलङ्कशीला ।
तस्याः मुखेन स्तनमङ्गभङ्गी यूनस्तदा कस्य न कस्य जज्ञे ॥ २० ॥
यद्वीक्षणासक्तमना जनौघसंमर्दने स्वस्तनितम्बबिम्बा ।
विलोकिता कापि न कं चकार महास्यनेऽस्त्र समकालमेव ॥ २१ ॥
स्वं मन्यमाना हि गतौ गुरुत्वमवामदं नेऽस्य तया न धातुः ।
ईर्तीव कष्टास्पदे स्तनाद्यास्फालेन काचित्किल कोपितम् ॥ २२ ॥

आलिङ्गच सर्वाङ्गमथावनीशस्तमात्मजं मौलितले चुचुम्ब ।
निसर्गतः प्रेमपदं हि पुत्रः पितुर्विशेषेण महोदयं तु ॥ ३६ ॥
निषेदुपि श्री''''नृपो जयन्ते यथोचितं सर्वसमाजने च ।
अचीकरत्तत्र महीमहेन्द्रो महोत्सवं विश्वतरङ्गितोषम् ॥ ३७ ॥
स तस्य सूनोरजनिष्ट भक्त्या निरन्तरं पल्लवितप्रमोदः ।
राज्ञोऽपि मुख्यं गृहवाससारं श्लाघ्यं हि बन्धोः प्रतिपत्तिरेव ॥ ३८ ॥
परेद्युव(द्यवि)क्षोणिधवस्तरङ्गत्संवेगसर्वस्वसुधासमुद्रः ।
राज्यादिसंपत्परिरम्भसौख्ये पराङ्मुखश्चिन्तितवानथैवम् ॥ ३९ ॥
वंशेऽवतंसध्वजतुल्यमस्मिञ्जयन्तमेनं विनिवेश्य राज्ये ।
त्वरे महानन्दपदाय धीमान्विलम्बते कः परलोककार्ये ॥ ४० ॥
सदस्यभिप्रायमिमं निवेद्य सुतस्य सर्वं विदधे तथैव ।
अन्ते च योगेन तनुत्यजां स शिक्षाय मार्गं सुधियां नृपाणाम् ॥४१॥
श्रुताभिषेकं जनकस्य राज्ये तमेत्य भूगोचरखेचरेन्द्राः ।
नत्वोपढौक्योऽद्भुतढोकनानि सिषेविरे नम्रशिरःकिरीटाः ॥ ४२ ॥
प्रमोदितास्तेन महाप्रसादैर्निजं निजं राज्यमथुर्विसृष्टाः ।
महीपतेस्तस्य गुणैरनन्यैः सदानितान्तःकरणस्ततम्ने ॥ ४३ ॥
कुमद्वतीनामिव स प्रजानां लक्ष्मीविलासाय बभूव राजा ।
समूलकाषं कषितोरुदोषश्चित्रीयते तेन न कस्य चेतः ॥ ४४ ॥
हठो भवेच्चौर्यशठस्य जन्तोः क्षिप्रं विपक्षे बलिनि क्षयाय ।
कुण्ठत्वमायाति हि वज्रस्ले निशातधारापि कृपाणयष्टिः ॥ ४५ ॥
शुभाशुभाय प्रभविष्णुपूर्वं कर्मैव किं तत्र समुद्यमेन ।
यदेव भाव्यं भविता तदेव कर्म द्वितीयं व्यभिचारि चेदम् ॥ ४६ ॥
बीजं यथा वारि विनाङ्कुराय तथोद्यमं कर्म फलाय नैव ।
भवेदतो दूरितदोषमासीच्छ्रेयस्करं कर्म नयश्च तस्य ॥ ४७ ॥
अर्हन्स्ततः सप्तभिरप्यवन्ध्य प्रवृद्धशक्तित्रयकीर्तिरेव ।
राज्यं शशासाप्रवैरिनाशात्पडन्तरङ्गानविजित्य शत्रून् ॥ ४८ ॥

तेन प्रयुक्तापणवन्धमुख्या गुणा न वैफल्यमयुः कदाचित् ।
उप्ता नरैरुत्तमभूमिकासु सुवृष्टियोगादिव सस्यसङ्घा ॥ ४९ ॥
काले च पञ्चाङ्गमपि प्रकाममसात्यवृद्धैः सह मन्त्रमेषः ।
चकार दुर्वारतरारिवारनिवारणेऽसौ यदमोघमस्त्रम् ॥ ५० ॥
प्रशासतस्तस्य नयेन भूमिं क्रमादभूदङ्गगतं जिगीषोः ।
सिद्धित्रयं निर्ममतान्वितस्य यदेह दण्डत्रितयं मुमुक्षोः ॥ ५१ ॥
धर्मार्थकामत्रयमण्डनेन स मण्डयामास नृपप्रकाण्डः ।
जन्म स्वकीयं जिनरम्यहर्म्यश्रीताण्डवेन क्षितिमण्डलं च ॥ ५२ ॥
देवी क्रमाद्वा....युगेस्तनूना(?) तनुप्रमापूरनिरस्तशूरम् ।
असूत सूनुं रतिसुन्दरी च संचारिणं क्षात्रमिवाय धर्मम् ॥ ५३ ॥
आद्यस्तयोर्वज्रधराधिवीर्यो बभूव वज्रायुधनामधेयः ।
चक्रायुधोऽन्योऽरिवधूकपोलपत्राङ्कुरप्रासरसासिधेनुः ॥ ५४ ॥
यौ दानभोगाविव वैभवस्य व्योमाङ्गणस्येव च पुष्पदन्तौ ।
सौभाग्यरूपे इव यौवनस्य शोभाभरं बिभ्रतुरस्य राज्ञः ॥ ५५ ॥
सदा यतिं धारयता समन्तात्तथा सुवृत्तेन सदार्जवेन ।
भुजद्वयेनेव निजेन तेन रराज राजा तनयद्वयेन ॥ ५६ ॥
श्रुतेन शीलेन गुणोदयेन स्थाम्ना च धाम्ना च वपुःश्रिया च ।
अभूतपूर्वामपि तत्प्रभूता तावेव तन्योपमिनी नृपस्य ॥ ५७ ॥
प्रज्ञानिरेकेण बला बभूवुस्तयो समालिङ्गनेन कृतार्था ।
उद्दामसौभाग्यगुणोदयेन वशंवदा राजसुताश्च कान्ता ॥ ५८ ॥
अथाग्रमात्मानमिवात्मजं स शुभे निवेश्यार्हनि यौवराज्ये ।
निनाय कालं ललितैर्विलासैरसमनिधानाननुगत्य चित्तम् ॥ ५९ ॥
स्फुटप्रसूनप्रकरप्रसर्पत्सौरभ्यलुभ्यन्मधुपाङ्गनासु ।
कदाचिदामलवनावलीषु चिरं स रेमे रमणासहायः ॥ ६० ॥
समीरणान्दोलितवारिपूरतरङ्गरङ्गत्कमलोपहारे ।
क्रमातिथेयेषु सरःसु कान्ता वृतः कदाचिद्विदधेऽम्बुकेलिम् ॥ ६१ ॥

कदापि स प्रेम वशाद्वधूनां कपोलपालीकुचमण्डलीषु ।
चकार पत्राङ्कुरचक्रवालं परार्घ्यरोमाञ्चचयेन सार्धम् ॥ ६२ ॥
प्रियः प्रियालापविलासलास्यैराश्चर्यकृद्भिः सरकेलिमिश्र ।
कदाचिदन्तःपुरचक्रवालैश्चिरं स रम्यै(र्ल्यै) रमयांबभूवे ॥ ६३ ॥
व्यलीकमालोक्य समाकुलाभिरीर्ष्याभराकुञ्चितलोचनाभिः ।
तत्राश्रुबिन्दुच्छलतः प्रियाभिः कदाप्युपालम्भि विनाक्षरं सः ॥ ६४ ॥
कदाचिदासीत्स विलासिनीनां विलाससर्वस्वरसे निमग्नः ।
स नर्तयामास कदाचिदेताः सौन्दर्यचर्यापरिभूतरम्भाः ॥ ६५ ॥
गजेन्द्रशिक्षाचतुरो गजेन्द्रानदाम्यदुद्दाममदान्कदाचित् ।
कदाचिदुद्वेल''''''प्रवाहसंवाहसंदोहमवाहयच्च ॥ ६६ ॥
विचित्रशास्त्रार्थविचारसारैर्वाचस्पतेर्विभ्रममादधानः ।
कदापि गोष्ठीषु विशारदानां स धूनयामास मुदा शिरांसि ॥ ६७ ॥
कदाचन श्रीजिनशासनस्य प्रभावनादद्भुतपुण्यकृत्यैः ।
सुधाप्रवाहैरिव विस्फुरद्भिः श्रेयः फलां वल्लिमिवैधयत्सः ॥ ६८ ॥
अन्तः प्रसर्पत्परमप्रमोदप्रपञ्चयत्पुलका कुचश्रीः ।
कदाचिदुच्चैर्जिनमन्दिरेषु चकार पूजोत्सवमुत्सहिष्णुः ॥ ६९ ॥
क्वापि क्षणोऽमी क्षणदेन्दुकीर्तिः श्रीमद्गुरूणां वदनारविन्दे ।
वाचं दधाना मकरन्दमुद्रा भृङ्गी भुजङ्गोपमया पपौ च ॥ ७० ॥
तस्मिन्मही पालयति क्रमात्ता नयाश्रिते पञ्चमलोकपाले ।
ववर्ष काले जलदः समस्तप्रशस्यसस्योद्गममूलबीजम् ॥ ७१ ॥
तत्र प्रजाना पितरीव काम्ये प्रतापनिर्दग्धविपक्षकक्षे ।
स्वचक्रतो नोऽपरचक्रतो वा बभूव भीतिः परिशासति क्षमाम् ॥ ७२ ॥
कदाचिदानन्दितपौरवृन्दः पुरंदरस्पर्धिपरार्घ्यऋद्धिः ।
ययौ जगल्लोचनकैरवेन्दुर्नदीश्वर द्वीपमदृष्टपूर्वम् ॥ ७३ ॥
स तत्र विश्वत्रितयाह्निनेत्रचकोरचन्द्रानपनिर्विशेषाम् ।
विधाय पूजां जिनमन्दिरेषु प्रेक्षाक्षणं क्षोणिपतिर्ददर्श ॥ ७४ ॥

इतश्च सौधर्मपतिः सकलस्वर्वासिभिर्भूरिभिरभ्युपेतः ।
कर्तुं जिनेन्द्रायतनेषु पूजामहोत्सवं तत्र समाजगाम ॥ ७५ ॥
प्रेक्षाक्षणं चाद्भुतभूरिमल्लीसंगीतकव्यग्रसमग्रलोकम् ।
विभाव्य पूजामतिशायिनीं च शचीपतिर्भूमिपतिं बभाषे ॥ ७६ ॥
धन्योऽसि राजन्सफलं तवैव राज्यं धनं जन्म च जीवितं च ।
दुःखार्दितेऽपीह मनुष्यभावे यस्यातिभक्तिर्जिनपुंगवेषु ॥ ७७ ॥
अतः प्रसन्नोऽस्मि करोमि किं ते मनः प्रियं ब्रूहि पुरंदरोऽहम् ।
अथ क्षितीशोऽपि सहस्रनेत्रं विनम्रमौलिर्विनयाद्बभाषे ॥ ७८ ॥
देव प्रसूतोऽस्मि कुले प्रशस्ये सर्वोत्तमं चास्ति ममाधिराज्यम् ।
सुदुर्लभं जन्मशतैरपीह प्राप्तं मया श्रीजिनशासनं च ॥ ७९ ॥
प्रियं प्रभो स्यात्किमतः परं मे येनार्थितां यामि तवेत्युदीर्य ।
स्थिते नृपेऽनिस्पृहतातिरेकाद्विशेषहृष्टस्तमुवाच शक्रः ॥ ८० ॥
यद्यप्यलुब्धस्य तवास्ति कार्यं न नाम केनापि तथापि राजन् ।
भविष्णुतीर्थेश्वरवैभवेन तवास्तु सख्यं मम निर्व्यपेक्षम् ॥ ८१ ॥
उक्त्वैवमालिङ्ग्य निजासनार्धे निवेश्य कृत्वा क्षणमिष्टगोष्ठीं ।
पुरंदरः क्षोणिपुरंदरश्च निजं निजं स्थानमथेयतुर्लौ ॥ ८२ ॥
देवा मत्पात्रदानात्प्रमरपरमश्रद्धया तद्विधातु-
प्रत्यक्षीभूय जन्तोर्विदधति सुदृशः प्राज्यराज्यप्रसादम् ।
क्षुत्क्षामस्यापि पुण्यापचयपरिचयादासमुद्रान्तपृथ्वी-
पृथ्वीपालैर्विनम्रस्फुटमणिमुकुटैश्चुम्ब्यपादारविन्दम् ॥ ८३ ॥
लक्ष्मीर्वेश्मनि दानभोगसुभगा वाणी प्रसन्नानने
दोर्दण्डद्वयमण्डपे च विजयश्रीमुक्तभूपान्तरा ।
कीर्तिर्नृत्यति दुग्धसिन्धुलहरीलीलाचरित्रे चिरं
श्रद्धापूर्वकसाधुदानजनिते पुण्येऽङ्गिना जाग्रति ॥ ८४ ॥
त्रैलोक्य ललितैर्यशोभि ··· 'यत्यर्पते देहिना
काय कान्तगुणानुबन्धमधुरे श्वेतागुरुभ्रैर्गुणै ।

यच्च श्रीजिनशासनोन्नतिनटीनाट्यप्रमोदैर्मन-
स्तन्मन्ये शुभपात्रदानसुकृतप्राग्भावविस्फूर्जितम् ॥ ८५ ॥
इत्थं नन्दोपनिषदुदयात्स्वानुभूतप्रभावं
स्रावं स्रावं मुनिवितरणं भक्तिसंदर्भगर्भम् ।
सार्वः सर्वं गुरुरिव जनं तत्र सोत्कण्ठमुच्चैः
कुर्वन्नुर्वीमवनितिलकः श्रीजयन्तः प्रशास्ति ॥ ८६ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीतन्दाङ्के नरेन्द्रराज्यस्थितिवर्णनो नामैकोनविंशः सर्गः ।

ग्रन्थकर्तुः प्रशस्तिः ।

आसीच्चन्द्रकुलाम्बराम्बरमणिः श्रीवर्धमानप्रभोः
पादाम्भोरुहचञ्चरीकचरितश्चारित्रिणामग्रणीः ।
स श्रीसूरिजिनेश्वरस्त्रिपथगापाथःप्रवाहैरिव
स्वैरं यस्य यशोभरैस्त्रिजगतः पावित्र्यमासूत्रितम् ॥ १ ॥
अभवदभयदेवः सूरिरस्मात्स यस्य
प्रभुरभजत तोषं स्तम्भने पार्श्वनाथः ।
प्रकटितविकटार्था सद्गसाम्राज्यवृद्ध्यै
व्यधित निधिममानां यश्च वृत्तिं नवाङ्ग्याः ॥ २ ॥
तच्छिष्यो जिनवल्लभः प्रभुरभूद्विश्वंभरामामिनी-
भास्वद्भालतलामकोमलयशःस्तोमः शमारामभूः ।
यस्य श्रीनरवर्मभूपतिशिरःकोटीररत्नाङ्कुर-
ज्योतिर्जालजलैरपुष्यत सदा पादारविन्दद्वयी ॥ ३ ॥
कश्मीरानपहाय संततहिमव्यासङ्गवैराग्यतः
प्रोन्मीलट्टणमंददा परिचिते यस्याम्यपदे ।
मान्द्यामोदतरङ्गिता भगवती वाग्देवता तन्मुखी
धत्ते काव्यकाव्यरचनाव्याजान्नृत्यचिरम् ॥ ४ ॥
बृहद्गच्छहृत्कमले जिनसंभवराजः
सूरिरमृत प्रभवर्णितकायधृतिः ।

जिग्ये जगत्त्रयजयप्रयतोऽपि येन
वीरव्रतं कलयता रतिजीवितेशः ॥ ५ ॥

वैराग्यं याति रागे भजति विधुरतां कोपपोषे विमाने
माने नष्टाभिमाने कपटपटुभटे क्षोभमाप्ते च लोभे ।
पञ्चेषौ कुण्ठितेषौ समिति निजमिति प्रेक्ष्य सैन्यं सदैन्यं
मुक्त्वा येषां जयाशां निभृतमपसृतं मोहराजेन दूरम् ॥ ६ ॥

भग्गुणितकरणः क्षमया विराजितश्चारुविग्रहस्तदनु ।
अजनि वशीकृतविषयग्रामः पद्मेन्दुमुनिराजः ॥ ७ ॥

उत्फुल्लमल्लीप्रतिमल्लकान्तिः कीर्तिर्भ्रमन्ती भुवनेषु यस्य ।
धिया समं सौहृदकाङ्क्षयैव मुष्णाति विष्णोरपि कृष्णभावम् ॥ ८ ॥

विश्वत्रयप्रथितकीर्तिलतस्य तस्य
शिष्यः प्रशस्यमहिमाभयदेवसूरिः ।
काव्यं जयन्तविजयं रचयांचकार
सारस्वतप्रसमरप्रतिभाविलासः ॥ ९ ॥

द्विकरिकुलगिरिदिनकर(१२७८)परिमितविक्रमनरेश्वरसमायाम् ।
द्वाविंशतिशतमानं शास्त्रमिदं निर्मितं जयतु ॥ १० ॥

जयन्तविजयकाव्यं परिपूर्णमिति भद्रम् ।